॥ श्रीः ॥

चौखम्बा सुरभारती ग्रन्थमाला

६७

संस्कृतसाहित्येतिहास-कुञ्जिका

(विश्वविद्यालयीयछात्रोपयोगिसंस्करणम्)

लेखक—

आचार्य परमानन्द शास्त्री

(एम० ए०, शास्त्री, साहित्याचार्य, साहित्यरत्न)

प्रधानाचार्य

सनातनधर्म संस्कृत कालेज, होशियारपुर (पंजाब)

चौखम्बा सुरभारती प्रकाशन

वाराणसी

प्रकाशक

चौखम्बा सुरभारती प्रकाशन

के० ३७/११७, गोपालमन्दिर लेन

पो० बा० नं० ११२९, वाराणसी २२१००१

दूरभाष : ३३३४३१

पुनर्मुद्रित संस्करण 2002 ई.

मूल्य 20-00

अन्य प्राप्तिस्थान

चौखम्बा संस्कृत प्रतिष्ठान

३८ यू. ए., जवाहरनगर, बंगलो रोड

पो० बा० नं० २११३

दिल्ली ११०००७

*

प्रमुख वितरक

चौखम्बा विद्याभवन

चौक (बनारस स्टेट बैंक भवन के पीछे)

पो० बा० नं० १०६९, वाराणसी २२१००१

दूरभाष : ३२०४०४

मुद्रक

श्रीजी मुद्रणालय

वाराणसी

प्रस्तावना

साहित्य समाज का दर्पण है। हमारा संस्कृत-साहित्य अति विशाल एवं विश्व में प्राचीनतम साहित्यों में से अन्यतम है। विश्व के सभी ज्ञान-विज्ञान, कला-संस्कृति एवं साहित्यिक विधाओं का स्रोत इसी साहित्य से प्रवाहित होकर समस्त संसार को पवित्रतम ज्ञान-गंगा में स्नान कराकर प्रगति प्रदान कर रहा है। समाज का प्रतिबिम्ब साहित्य में होता है और साहित्य का सर्वाङ्गीण चित्र इतिहास प्रस्तुत करता है। 'इतिहास' शब्द का अर्थ है–इति + ह + आस, अर्थात् यह ऐसा था। अतः प्राचीन भारतीय समाज का चित्रण संस्कृत-साहित्य में है और उस विशाल साहित्य को जानने के लिये संस्कृत-साहित्य का अध्ययन अत्यन्त अपेक्षित है। अतएव प्रायः सर्वत्र ही संस्कृत की परीक्षाओं में संस्कृत-साहित्य का इतिहास पाठ्य-क्रम में निर्धारित है। एक तो इतिहास जैसा विशाल, अगाध एवं दुरूह विषय और उसमें भी संस्कृत माध्यम से उस दुरूहता का ज्ञान कराने वाले सहायक ग्रन्थों का अभाव संस्कृत-जगत् में कोमल-बुद्धि छात्रों को हतोत्साह कर देता है। हिन्दी में संस्कृत-साहित्य के इतिहास को पढ़कर उस तथ्य को संस्कृत भाषा में प्रकट न कर सकने के कारण संस्कृत के छात्र समुचित अङ्क से वंचित रह जाते हैं और विषय को कठिन की संज्ञा देते हैं।

अतएव ऐसे ही छात्रों के लिये इस 'संस्कृतसाहित्येतिहास-कुञ्जिका' के लिखने का प्रयास किया गया है। इसकी भाषा अत्यन्त सरल एवं प्रचलित शब्दों की रखी गई है। जिससे छात्रों को एक-दो बार पढ़ते ही अभ्यास हो जाय। जहाँ तक सम्भव हो सका है, विषय को टिप्पणी का रूप देकर छोटा बनाने का एवं उत्तर के आकार को लघु बनाने का प्रयास किया गया है। सभी

तरह से छात्रों की कठिनाइयों का पूरा-२ ध्यान रखा गया है, जिससे छात्रों को सर्वाधिक लाभ हो।

इस कुञ्जिका को प्रकाशित करने में चौखम्बा सुरभारती प्रकाशन, वाराणसी ने जो सहयोग एवं संस्कृत-प्रेम प्रदर्शित किया है, उसके लिये हम उन्हें हार्दिक धन्यवाद देते हैं। अगला संस्करण हम छात्रों को इससे भी अधिक सुन्दर रूप में दे सकेंगे। यदि इस कुञ्जिका से संस्कृत के छात्र उपकृत हुए, तो मैं अपना प्रयास सफल समझूँगा और अगले संस्करण में इसकी कमियों को पूर्ण करूँगा।

दीपावली
४-११-१९८३ } —आचार्य परमानन्द शास्त्री

प्रश्नानुक्रमणिका

॥ श्रीः ॥

संस्कृतसाहित्येतिहास-कुञ्जिका

(१) प्रश्नः—कति वेदाः ? किञ्च तेषां महत्त्वं, समासतो वैदिक-साहित्यस्य परिचयं दत्त ।

उत्तरम्—हिन्दूधर्मस्य सर्वस्वमस्ति वेदः । सर्वस्मात्प्राचीनतमोऽयं ग्रन्थः । भारते धर्मस्य या निष्ठा दृश्यते, सा वेदमूलिकेति नात्र संशयः । महर्षिभिः कृतानुभवतत्त्वज्ञानस्य प्रतिपादको वेदः । स्मृतिपुराणेऽपि वेदानुकूले एव गौरवास्पदं मन्येते । अत एव वेदो धर्ममूलमित्युच्यते । वेदविहितो धर्म इति धर्मस्य परिभाषा क्रियते । आर्याणां सभ्यता संस्कृतिपरिचायकोऽपि वेद एव । एवं विविधाभिः दृष्टिभिः वेदस्यातिमहत्त्वं विद्यते । वेदस्य प्रधानतया द्वौ भेदौ स्तः, संहिता ब्राह्मणश्चेति । मन्त्रसमुदायः संहितेत्युच्यते । यज्ञस्य वर्णनात्मको भाग एव ब्राह्मण इत्यभिधीयते ।

ब्राह्मणभागस्य उपनिषद्ब्राह्मणारण्यकानि इति त्रयः भेदाः सन्ति । तत्र खलु ब्रह्मज्ञानसम्बन्धिनी—उपनिषत् । याज्ञिकाध्यात्मिकविषयस्य यत्र विवेचनं स्यात् स ब्राह्मणः । वानप्रस्थावस्थायां यत् क्रियते स्म, तदेवारण्यकमित्युच्यते ।

चतस्रः सन्ति संहिताः—(१) ऋक्संहिता, (२) यजुःसंहिता, (३) साम-संहिता, (४) अथर्वसंहिता चेति । एतत् संहिताचतुष्टयमेव ऋग्वेदः, यजुर्वेदः, सामवेदोऽथर्ववेदश्चेति नाम्नाभिधीयते ।

ऋग्वेदः—आसु चतसृषु संहितासु ऋग्वेदः सर्वस्मात् प्राचीनतमः । भाषार्थ-दृष्टिभ्यां वैदिकसाहित्ये ऋग्वेदस्य स्थानमत्युन्नतं विद्यते । अष्टभागेषु विभक्तोऽयम् ऋग्वेदः, अत अष्टक इत्यभिधीयते ।

सामवेदः—कथ्यते यत् सामवेदस्य सङ्कलनम् उद्गातॄणाम् ऋत्विजां च कृतेऽभूत् । यज्ञावसरे देवताभ्यः हूयतेस्म, देवान् आह्वयितुं स्तुति-मन्त्रं गीयते स्म । तद् गानमेव साम इत्यभिधीयते । ऋचः एव गीयन्ते स्म, अत ऋग्भिः पूर्णः समग्रो सामवेदः ।

यजुर्वेदः—गद्यं यजुरिति कथ्यते । अत्र तेषां गद्यवाक्यानां संकलनं विद्यते, यानि गद्यानि यज्ञावसरे प्रयोज्यन्ते स्म । यजुर्वेदस्य सम्बन्धः यज्ञानुष्ठानेनाधिकः दृश्यते । अस्य द्वौ भेदौ स्तः, कृष्णयजुर्वेदः शुक्लयजुर्वेदश्च । कृष्ण-

यजुर्वेदस्य एताः संहिताः सन्ति—(१) तैत्तरीयसंहिता, (२) मैत्रायणीसंहिता, (३) काठकसंहिता, कठकापिष्ठलसंहिता चेति।

अथर्ववेदः—अथर्ववेदस्य यज्ञेन सम्बन्धः नाममात्र एव, मारणोच्चाटन-मोहनादिक्रियाणां वर्णनं विशेषरूपेणाथर्ववेदे प्राप्यते। अथर्वऋषिणा दृष्टत्वात् अथर्वसंहितेति कथ्यते।

(२) प्रश्नः—विविधमत-पर्यालोचनपुरस्सरं वेदस्य रचनाकालो निर्णीयताम्।

उत्तरम्—वेदानां रचनाकालस्य याथातथ्यनिर्णयोऽतिदुष्करः। भारतीय-पाश्चात्यविदुषां सत्प्रयत्नेनापि वेदस्य रचनाकालः इदमित्थमिति वक्तुं न पारयामः। भविष्येऽपि निर्णयो भविष्यतीति न सम्भाव्यते।

भारतीयविद्वांसः एवं स्वीकुर्वन्ति। वेदोऽपौरुषेयः, नित्यः कालातीतश्च, अतः अस्य रचनाकालस्य प्रश्न एव न कार्यः। यतो हि अपौरुषत्वात् ऋषिभिः दृष्टत्वाच्च। वेदः गुरु शिष्य-परम्पराभिः श्रूयते, ज्ञायते, प्राप्यते वा, अत एव श्रौतशब्देन अभिधीयते वेदः। ज्ञानार्थको वेदः इति वेदसंज्ञापि सङ्गच्छते।

तथापि भारतीयविद्वांसः पाश्चात्यविद्वांसश्च वेदस्य रचनाकालमेवं विवेचयामासुः। तथा हि—

डॉ० मैक्समूलर—सर्वप्रथमं डा० मैक्समूलर महोदयः वेदस्य रचनाकालं निर्णेतुं यतते। छन्दकालः, मध्यकालः, ब्राह्मणकालः तथा सूत्रकालश्चेति वैदिक-युगं चतुर्षु भागेषु विभज्य, बौद्धधर्मस्योदयात्प्राक्, ब्राह्मणग्रन्थस्य रचनाकाल-मिति च स्वीकृत्य (१२००) द्विशताधिकसहस्रतमविक्रमशतकेभ्यः पूर्वं वेदस्य रचनाकालं श्रीमैक्समूलरमहोदयाः स्वीकुर्वन्ति। अयं भावः अस्य मतानुसारेण ऋग्वेदस्य रचना विक्रमात् (१२००) द्विशताधिकसहस्रवर्षपूर्वं जातेति।

लोकमान्यतिलक—लोकमान्यतिलकमहोदयः तथा पाश्चात्यप्रसिद्धविद्वान् डा० याकोबीमहोदयश्च ज्योतिष-सम्बन्धि गवेषणां विधाय वेदस्य रचनाकालं विक्रमशताब्द्याः चतुःसहस्रवर्षपूर्वं स्थिरीकुरुतः।

तिलकमहोदयः वैदिककालम् 'अदितिकालः' (६०००–४०००), 'मृग-शिराकालः' (४०००–२५००), 'कृत्तिकालः' (२५००–१४००), अन्तिम-कालश्चेति (१४००–५०० वि० सं० पू०) चतुर्भागेषु संविभज्य वैदिककाल-स्यान्तिमे भागे बौद्धधर्मस्योदयो जात इति स्वीकरोति।

तिलकमहोदयस्य मतमिदं बहवः पाश्चात्यविद्वांसोऽपि साम्प्रतं स्वीकुर्वन्ति। अतः अधुना तिलकमहोदयस्यैव मतं प्रामाणिक मन्यन्ते।

अयमाशयः—तिलकमहोदयस्य मतानुसारेण वेदस्य रचना विक्रमशताब्द्याः चतुःसहस्रवर्षपूर्वं जातेति सिद्ध्यतीति ।

(३) प्रश्नः—किं तावन्महाभारतम् ? तत्कर्ता च कः ? तस्य सांस्कृतिकमहत्त्वं रचनाकालश्च समासतो विवेचनीयः ।

उत्तरम्—महाभारते अस्माकं जातीयेतिहासो विद्यते । भारतीय सभ्यता-संस्कृतेः स्वरूपमत्रैव प्राप्यते । महाभारते न केवलं कौरव पाण्डवयोरितिहास-वर्णनमपि तु हिन्दूजातीनां भावनाप्यत्र वर्णितास्ति । अतः हिन्दूनां धार्मिकग्रन्थो-ऽयम् । भारतीयसंस्कृतसाहित्यस्य सर्वश्रेष्ठो ग्रन्थः श्रीमद्भगवद्गीताऽस्यैवांशः । विष्णुसहस्रनाम अनुगीता, भीष्मस्तवराजः, गजेन्द्रमोक्षः, श्रीमद्भगवद्गीता एते पञ्च महाभारतस्य रत्नांशाः सन्ति ।

एभिः गुणैरेव महाभारतं पञ्चमो वेद इति कथ्यते । महाभारतस्य कथा-माश्रित्यैव विविधैः कविभिः संस्कृतसाहित्ये काव्य नाटक-गद्य पद्य-चम्पू कथा-ख्यायिकाः रचिताः, अतः कवीनामुपजीव्योऽयं ग्रन्थः ।

"यदिहास्ति तदन्यत्र यन्नेहास्ति न तद् क्वचित्" इति प्रसिद्धास्ति महा-भारतस्य गरिमासूक्तिः ।

अस्य कर्ता श्रीवेदव्यास आसीत् माता चास्य सत्यवती । पराशरजातत्वात् पाराशर्यः । यमुनायाः कस्मिंश्चित् द्वीपे अस्य जन्मजातमत एव द्वैपायनः,अथवा द्वीपे समुत्पन्नत्वात् द्वैपायन इति च कथ्यते । कृष्णवर्णत्वात् कृष्णद्वैपायनः, यज्ञो-पयोगिभागानां भाजकत्वात् वेदव्यासश्चोच्यते ।

महाभारतस्य रचनाकालः—४४५ ख्रीष्टीयाब्दस्य शिलालेखे "शत साहस्र्यां संहितायां वेदव्यासेनोक्तम्" इति महाभारतस्य निर्देशः प्राप्यते । अतः द्विशत-वर्षपूर्वमस्यास्तित्वं प्रतीयते ।

कनिष्क-सभापण्डितः श्रीअश्वघोषः वज्रसूच्यां हरिवंश महाभारतयोः पद्य-मुद्धरति । आश्वलायनगृह्यसूत्रे विष्णुसहस्रनाम्नः उल्लेखः तथा श्रीमद्भगवद्-गीताया उद्धृतश्लोकश्च प्राप्यते । अनयोः द्वयोः ग्रन्थयोः स्थितिकालः ईस्वीय पूर्वं चतुःशताब्द्यां मन्यते । अतः महाभारतस्य मूलरचना इतोऽपि पूर्वं जातेति प्रतीयते ।

बुद्धात् पूर्वं महाभारतस्य रचना जातेति निश्चप्रचम् । अतः महाभारतस्य रचनाकालः ४०० ईस्वीतः द्विशतवर्षपूर्वं मन्तव्य इति न्यायसङ्गतं प्रतिभाति ।

(४) प्रश्नः—रामायणस्य को मुख्यो रस इति युक्तियुक्तं प्रति-पादनीयम् ।

उत्तरम्—वस्तुतः महाकाव्यस्यादर्शः वाल्मीकिकृतरामायणेनैव ज्ञायते ।

यदि वाल्मीकिर्न स्यात् तदा कवे: वास्तविकस्वरूपस्याभिरामं दर्शनं कुत्र क्रियेत ? महाकाव्यस्य माहात्म्यं तस्य शैली वा कुत्र परिचीयेत ? अत: काव्यस्य निकषं रामायणमिति निश्चप्रचम् ।

यदा वियोग-ताप-सन्तप्ताया: क्रौञ्च्या: सकरुणनिनादं श्रुत्वा महर्षे: हृदय-गतशोक: श्लोकत्वमाप्त: तदैव निर्णयो जात: काव्यस्यात्मा रस इति । अनेकै: साहित्य-तत्त्वविद्भि: साश्चर्यं तथ्यमिदं प्रकटितम्—

"समाक्षरैश्चतुर्भिर्य: पादैर्गीतो महर्षिणा ।
सोऽनुव्याहरणाद् भूय: शोक: श्लोकत्वमागत: ।।"

मतमिदमाश्रित्यैव आनन्दवर्धनाचार्य: सामान्यतया काव्ये प्रतीयमानार्थस्य मुख्यत्वेऽपि रस एव काव्यस्यात्मा इति स्वीकृतवान् । तथा हि—

"काव्यस्यात्मा स एवार्थस्तथा चादि कवे: पुरा ।
क्रौञ्च-द्वन्द्व-वियोगोत्थ: शोक: श्लोकत्वमागत: ।।"

इति रामायणे को मुख्यो रस इत्यस्मिन् विषये संस्कृतसाहित्यस्य बहव: ख्यातिप्राप्ता: कवय: समालोचका: निजमतं प्रकटितवन्त: । सर्वै: रामायणे मुख्यो रस: करुण इति स्वीकृतश्च । महर्षे: कारुण्यमेव रामायणस्यादिकारणम्, अत: कोऽत्र सन्देह: रामायणे मुख्यरसत्वे करुणस्येति । श्रीआनन्दवर्धनाचार्येण रामायणे मुख्यरसत्वं करुणस्यैव स्वीकृतम् । यतो हि—रामायणस्यारम्भ: करुणादेव जात: । रामस्य सम्मुखे सीताया: पृथिव्यामन्तर्धानात्मकोऽन्तश्च करुणादेवाभूदिति । आनन्दवर्धनाचार्येणोक्तं यथा—"रामायणे हि करुणो रस: स्वयमादिकविना सूचित: शोक: श्लोकत्वमागत: इत्येवं वादिना निर्व्यूढश्च । स एव सीताऽत्यन्तवियोगपर्यन्तमेव स्वप्रबन्धमुपचरता महाकविभवभूतिना तु न केवलं करुणरसस्य मुख्यत्वमेव स्वीकृतम्, अपितु सर्वेषां रसानां प्रकृतिबीजं करुण इत्युद्घोषितम् ।

तथा हि—

एको रस: करुण एव निमित्तभेदात्, भिन्न: पृथक् पृथगिवाश्रयते विवर्तान् ।
आवर्त बुद्बुद-तरङ्गमयान् विकारान्, अम्भो यथा सलिलमेव हि तत्समस्तम् ।।

इति भवभूते: उद्घोषणा । भवभूतिस्तु रामायणनायकस्य श्रीरामचन्द्रस्य करुणविलापेन पाषाणमप्यरोदयत् ।

"अपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम्"

श्रीरामस्य करुणं प्रदर्श्य लिखति कवि:—

अनिर्भिन्नो गभीरत्वात्, अन्तर्गूढघनव्यथः ।
पुटपाकप्रतीकाशो रामस्य करुणो रसः ॥

यस्य काव्यस्य नायकगतो रसः ईदृशः करुणः तत्र कोऽन्यो मुख्यो रसो भवितुमर्हति । अतः रामायणस्य मुख्यो रसः करुण इति निश्चयम् ।

(५) प्रश्नः—रामायणस्य कति टीकाः ? के च कर्तारः ? तेषां नाम लेख्यम् ।

उत्तरम्—रामायणं न केवलं काव्यग्रन्थः, अपितु धर्मग्रन्थोऽप्यस्ति । अतः रामायणमाश्रित्य विभिन्नसम्प्रदायेषु समये समये रामायणस्य विविधाः टीकाः समभूवन् , डा० ऑफ्रेक्ट महोदयेन रामायणस्य त्रिंशट्टीकाः प्रमाणीकृताः । मध्यकाले रामायणस्य लोकप्रियतात्यधिकाऽऽसीत् । अतः क्रमशः पञ्चदश, षोडश, सप्तदशशताब्दीषु रामायणस्य दशाधिकाः टीकाः जाताः ।

मुख्यतया एते टीका कर्तारः तथा तेषां टीकाश्च सन्ति—

(१) वाधूलगोत्रियो वरदाचार्यस्य पुत्रः श्रीरामानुजः रामानुजीय-नाम्नीं टीकां १४०० ईस्व्यां समालिखत् ।

(२) हारीतगोत्रीयेण वेङ्कटकृष्णध्वरी-महोदयेन रामायणस्य सर्वार्थसारा नाम्नी टीका १५२० ईस्व्यां कृता ।

(३) श्रीवैद्यनाथदीक्षितेन १५०० ईस्व्यां रामायणस्य "दीपिका" नाम्नी टीका कृता ।

(४) श्रीईश्वरदीक्षितेन रामायणस्य "बृहद्विवरणम्" "लघुविवरणम्" चेति द्वे टीके लिखिते ।

(५) श्रीमहेश्वरतीर्थेन "रामायणतत्त्वदीपिका" टीका पञ्चदश शताब्द्यां कृता ।

(६) रामायणभूषण-नाम्नी टीका श्रीगोविन्दराजेन कृता ।

(७) अहोबिल आत्रेय, १७०० ईस्व्यां रामायण-टीकां समालिखत् ।

(८) श्रीकतक योगीन्द्रमहोदयेन "अमृत" नाम्नी टीका कृता ।

(९) श्रीनागोजिभट्टेन१८०० ईस्व्यां रामायणतिलक नाम्नी टीका कृता ।

(१०) श्रीवंशीधरशिवसहायमहोदयाभ्यां १८२५ ईस्व्यां रामायण शिरोमणि नाम्नी टीका कृता ।

(११) लोकनाथचक्रवर्तिमहोदयेन मनोहरा नाम्नी टीका कृता ।

(१२) श्रीत्र्यम्बकमहोदयेन धर्माकूतनाम्नी टीका कृता । प्रसिद्धाः रामायणस्यैताः टीकाः सन्ति ।

(६) प्रश्नः—रामायण-महाभारतयोः तुलना कार्या ।

उत्तरम्—रामायणमादिकाव्यं मन्यते, महाभारतञ्चेतिहासम् । रामायणे काव्यगतवैशिष्ट्यमधिकं दृश्यते । अतः रामायणमादिकाव्यमिति कथ्यते । महाभारते राज-चक्राणां युद्धवर्णनमधिकं जातमतः महाभारतम् इतिहास इत्यभिधीयते । यद्यपि रामायणेऽपि रामरावणयोः युद्धं भवत्येव तथापि युद्धमिदं प्रकरणस्य सहायकमेवेति । रामायणे कवेरुद्देश्योऽस्ति सीतारामयोः चरित्रस्य काव्यगतशैल्यां प्रस्तुतीकरणम् । महाभारते कौरवपाण्डवयोः युद्धं वर्णयन् कविः अनेकेषां राज्ञां कथां वर्णयति । नायमेकवृत्तात्मको ग्रन्थः, परन्तु रामायणमेकवृत्तात्मकं काव्यं विद्यते ।

भौगोलिकसीमावर्णनेनापि द्वयोः साम्यं न दृश्यते । रामायणे भारतस्य दक्षिणी सीमा विन्ध्याचलः दण्डकारण्यश्च दृश्यते, एवं पूर्वी सीमा विदेहः, पश्चिमी सीमा च सौराष्ट्रः । महाभारते तु भारतस्य पूर्वी सीमा गङ्गाशोणयोः सङ्गमः, दक्षिणी सीमा चोलः तथा मलयावरप्रान्तो वर्ण्यते । रामायणमादावारभ्यान्तमेककवेः कृतिः । अत एवास्य कविता सरसा, शब्दार्थमञ्जुगुम्फिता परिष्कृता चास्ति । महाभारते एतादृशं साहित्यिकसौन्दर्यं न प्राप्यते । शताब्दीं यावत् महाभारतस्य रचना क्रमशः जाता । पश्चाच्च विशालकायग्रन्थो जातः ।

रामायणमहाभारतयोः कस्य रचना प्रथमं जातेति विषये सर्वप्रथमं जर्मनीदेशवास्तव्यो डा० वेबरमहोदयः उद्घोषितवान् यत् महाभारतस्य रचना प्रथमं जातेति । परमिदं युगानुसारं युक्तियुक्तं च न प्रतीयते । वाल्मीकिः त्रेतायुगीयस्य रामस्य समकालीन आसीत् । महाभारतस्य प्रणेता व्यासः द्वापरयुगीयः, अतः रामायणस्यैव रचना प्रथमं जातेति न्यायसङ्गतं प्रतिभाति ।

(७) प्रश्नः—विविधमतपर्यालोचनपुरस्सरं रामायणस्य रचनाकालः स्थिरीक्रियताम् ।

उत्तरम्—रामायणस्य रचना कदाऽभवत् इत्यस्मिन् विषये विद्वांसः रामायणस्याध्ययनात् अस्य रचनाकालं निम्नाङ्कितप्रकारेण स्थिरीकुर्वन्ति—

(१) मगधनरेशोऽजातशत्रुः (५०० ई० पू०) पाटलिपुत्रस्य (पटना) स्थापनां कृतवान् । अनेनैव राज्ञा शत्रोराक्रमणात् रक्षार्थं गङ्गा-शोणयोः सङ्गमस्थले दुर्गमेकं निर्मापितम् । रामायणे गङ्गा-शोणयोः सङ्गमात् श्रीरामस्य गमनं वर्णितमस्ति, अतः रामायणस्य रचना ५०० ई० पूर्वात् प्रागेव सिद्ध्यति ।

(२) रामायणे कौशलनरेशस्य राजधानी, अयोध्येति वर्णितास्ति । परन्तु बौद्धजैनग्रन्थेषु नगरमिदं 'साकेत' नाम्ना प्रसिद्धं दृश्यते । रामपुत्रो

लवः स्वराजधानीं श्रावस्त्यां स्थापितवान् । बुद्धस्य समये कौशलनरेशः प्रसेनजित् श्रावस्त्यामेव राज्यं करोति स्म । अतः रामायणस्य रचना बुद्धात्-प्रागेव भवितुमर्हति ।

(३) रामायणे दक्षिणभारतस्य बहुतरप्रदेश-भूभागम् अरण्यानिरूपेण वर्णितमस्ति । यत्र वानराणां जातिविशेषाः निवसन्ति स्म । अत्र प्रदेशे आर्य-सभ्यतायाः विकासात् प्रागेव रामायणस्य रचना जातेति सिद्ध्यति ।

(४) रामायणे "गङ्गाकूले निविष्टास्ते विशालां ददृशुः पुरीम् ।" (वा० रा० अ० ८०, श्लो० ४९) एवं प्रकारेण रामस्य विशालापुर्यां गमनं वर्णित-मस्ति । एतां विशालां अलम्बुषायाः पुत्रः विशालानामा स्वकीयेन नाम्ना निर्मापयामास । रामायणे विशाला मिथिला चेति द्वे राज्ये वर्णिते स्तः । बुद्धस्य समये इमे द्वे नगर्यौ वैशालीराज्यान्तर्गतेव वर्णिते अनेनैव प्रमाणेन च रामायणं बुद्धात्प्राचीनं सिद्ध्यति । एतेषां ग्रन्थानां प्रमाणानां पर्यालोचनेन रामायणस्य रचना बुद्धस्य प्रादुर्भावात् प्रागेव सिद्ध्यति । अतः रामायणस्य रचनाकालः ईसातः (५००) पञ्चशतवर्षं प्रागेव मन्तव्यः इति न्यायसङ्गतं प्रतिभाति ।

(८) प्रश्नः—रामायणमादिकाव्यं वाल्मीकिश्चादिकविरिति प्रति-पाद्य वाल्मीकिरामायणस्य काव्यगतवैशिष्ट्यं प्रदर्श्यताम् ।

उत्तरम्—संस्कृतसाहित्ये लौकिक छन्दोबद्ध-कवितायाः प्रादुर्भावः वाल्मी-कित एव जातः । अत एव वाल्मीकिकृत-रामायणमादिकाव्यं कथ्यते । महर्षिः वाल्मीकिः कया प्रेरणया रामायणमलिखत् इत्यस्मिन् विषये प्रसिद्धास्ति घट-नैका । यदा महर्षिः सरसि स्नात्वा निवर्तमान आसीत्, तदा कस्यचित् व्याधस्य शरैर्विद्धं क्रौञ्चद्वन्द्वयोरेकं मृतं विलोक्य विलपन्तीं क्रौञ्चीमपश्यत् । करुणया विह्वलस्य वाल्मीकेः मुखारविन्दात् शोकतरङ्गिणी वाणी श्लोकरूपेणैवं निःसृतवती—

"मा निषाद प्रतिष्ठात्वमगमः शाश्वतीः समाः ।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥

श्रीमहर्षेः मुखनिर्गलितं करुणामयञ्चेदं पद्यं भारतीयकाव्यस्य आदिकविता जाता । वाल्मीकेः परमकल्याणमयीं वाणीमिमां श्रुत्वा स्वयं ब्रह्मा समुपस्थित-वान् । वाल्मीकिं रामायणं रचयितुं चाकथयत् । अनया प्रेरणयैव महर्षिः रामा-यणमरीरचत् । सर्वप्रथमञ्च लौकिकछन्दो निबद्धस्य रामायणस्य रचना जाता । अत एव रामायणमादिकाव्यं, वाल्मीकिश्चादिकविरिति कथ्यते ।

वाल्मीकिकृतादिकाव्यं संस्कृतसाहित्यस्य निधिः। सरसता, स्वाभाविकता चास्य काव्यस्य विशेषता विद्यते। विविधरसानां समञ्जुल-समन्वयेन विविधोपवनपर्वतादिवर्णनेषु मनोहराणां सरलानां शब्दानां प्रयोगेण च काव्यमिदं भावपूर्णार्थसाभिव्यक्तिं विधाय निखिलेऽस्मिन् साहित्ये स्वीयं वैशिष्ट्यं तनोति। आलङ्कारिकशब्दावली हठादेव काव्यरसरसिकान् मोहयति। यथा—

"राक्षसेन्द्र महासर्पान् स रामो गरुडो महान्।
उद्धरिष्यति वेगेन वैनतेय इवोरगान्॥

सीतायाः वर्णने सौन्दर्यस्याभिव्यक्तिं कीदृशेन चातुर्येण करोति कविरिति दृश्यताम्।

'त्वां कृत्वोपरतो मन्ये रूपकर्ता स विश्वकृत्।
न हि रूपोपमा ह्यन्या तवास्ति शुभदर्शने॥"

सन्ध्याचन्द्रयोरुपरि नायक-नायिकयोरारोपं कुर्वन् तथाऽम्बरशब्दस्य प्रयोगं श्लिष्टं कीदृग् वर्तते—

"चञ्चच्चन्द्रकरस्पर्शहर्षोन्मीलित-तारका।
अहो रागवती सन्ध्या जहाति स्वयमम्बरम्॥"

एवं क्वान्तं वर्णयामः रामायणस्य वैशिष्ट्यम्। आदिकवेः रामायणस्य काव्यगतवैशिष्ट्यं लेखिन्या बहिर्गतं विषयं विद्यते इति नात्र संशयः।

(९) प्रश्नः—समासतो काव्यभेदान् प्रदर्श्य तद् विकासपरम्परां वर्णयत।

उत्तरम्—वस्तुतः कृतायां समालोचनायां संस्कृत-साहित्ये प्रधानतया काव्यस्य द्वौ भेदौ स्तः। दृश्यकाव्यं श्रव्यकाव्यञ्च। दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतमिति दर्पणकारैरप्युक्तम्। दृश्यकाव्यस्य गद्य-पद्य-चम्पूरूपाः इति त्रयः उपभेदाः सन्ति। तत्र खलु पद्यकाव्यमपि महाकाव्यं, खण्डकाव्यं तथा मुक्तकभेदात् त्रिविधं भवति। दृश्यं रूपकं नाटकञ्चेति कथ्यते। अवस्थानुकृतिर्नाट्यं तद्रूपात्तु रूपकमिति शब्देन अनयोर्दृश्यरूपकयोः आचार्यैः व्याख्या व्यधायि। समासतो एतानेव काव्यभेदान् पश्यामः।

काव्यस्योत्पत्तिः विकासपरम्परा च—

केषाञ्चित् विदुषां मतेन निखिलविश्वेषु प्राचीनतमो ग्रन्थः ऋग्वेदः, अत ऋग्वेद एव महाकाव्यस्योत्पत्तेः मूलकारणमिति।

तदितरे आचार्याः काव्यस्योत्पत्तौ ब्राह्मणग्रन्थेतिहासाग्निपुराणाण्याधारभूतं कारणमिति स्वीकुर्वन्ति। परन्त्वेतद् न रुचिकरं प्रतिभाति। वस्तुतो वाल्मीकि-

कृतरामायणमेव काव्य-साहित्ये प्रथमं काव्यं तथा काव्यस्योत्पत्तौ बीजं कारणं वेति युक्तियुक्तं प्रतिभाति ।

काव्यालङ्कारसूत्रस्य कर्ता श्रीनेमिसाधुः अलिखत् यत् सर्ववित् पाणिनिः (४०० ई० पू०) पातालविजय-जाम्बवतीविजय-नामकं काव्यद्वयमरचयत् । महर्षिः पतञ्जलिरपि पातञ्जले महाभाष्ये काव्यसाहित्यस्य परिचयमददानः कंसवधं, बालिवधं इति नाटकनिर्देशञ्च कुर्वन् वासवदत्ताद्याख्यायिकाः परिचाययति । इत्यादिप्रमाणैः सिद्धयति यत् संस्कृतसाहित्ये गद्य-पद्यमहाकाव्यानां तथा नाटकाख्यायिकानाम् ईस्वीपूर्वद्वितीयशताब्द्याः प्रागेव भूयान् प्रचारः प्रसारो वासीत् ।

रुद्रदामन-महोदयस्य गिरिनारशिलालेखेन (१५० ई० पू०) तथा हरिषेण-कृत प्रयागस्थ अशोक-स्तम्भ-लिखित-समुद्रगुप्त-प्रशस्ति-लेखेनापि (३५० ई० पू०) प्रमाणीभवति यत् महाकाव्यस्य प्रगतिः तस्मिन् समये नितरां सन्तोष-जनिकाऽऽसीत् । इति ।

(१०) प्रश्नः—विविधकाव्यलक्षणं सपरिष्कारं प्रदर्श्य सोदाहरणं महाकाव्यलक्षणं प्रतिपादनीयम् ।

उत्तरम्—"तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि" इति मम्मटेन काव्यलक्षणं व्यधायि । अयं भावः दोषसामान्याभाववत्वे सति, गुणालङ्कार-वच्छब्दार्थत्वं काव्यत्वमिति । रमणीयार्थप्रतिपादकः शब्दः काव्यमिति काव्य-लक्षणं प्रतिपादयता जगन्नाथेन शब्दार्थयोः काव्यत्वमस्वीकृत्य केवलं शब्दस्यैव काव्यत्वं स्वीक्रियते । एतन्मते शब्दार्थयोः काव्यत्वे काव्य-प्रवृत्तिनिमित्तं शब्दा-र्थयोः व्यासक्तं प्रत्येकं पर्याप्तं वा, इति समुदिते प्रश्ने आद्य पक्षाङ्गीकारे एको द्वाविति व्यवहारस्येव श्लोकवाक्यस्यापि काव्यत्वव्यवहारानुपपत्तिः । द्वितीयपक्षे एकस्मिन् पद्ये काव्यद्वयस्य व्यवहारः स्यात्, काव्यलक्षणमपि शब्दनिष्ठमेवोचितं, न त्वर्थनिष्ठम् । इति जगन्नाथमतमपि नोचितं प्रतिभाति यतो हि काव्यलक्षणस्य उभयवृत्तित्वात् । काव्यं पठितं, श्रुतं, काव्यं बुद्धम् इत्युभयविधव्यवहार-दर्शनाच्च । काव्यपदनिमित्तं शब्दार्थोभयनिष्ठम् इति काव्यप्रकाशोक्तं निर्बाधम् । अत एव वेदत्वादेः उभयवृत्तित्वप्रतिपादकः, 'तदधीते तद् वेद' इति सूत्रस्थ महा-भाष्यं सङ्गच्छते ।

'वाक्यं रसात्मकं काव्यम्' इति काव्यलक्षणं विदधता विश्वनाथेन मम्मटोक्त-विशेषणविशिष्ट-शब्दार्थयोः काव्यत्वदोषाणां दुर्वारतया काव्यस्य निर्विषयत्वं प्रविरलविषयत्वं वा स्यात् । तस्मात् मदुक्तमेव काव्यलक्षणं न्याय्यम् । एवं रसवत्

दुष्टेऽपि वाक्ये काव्यत्वं भवत्येव, अत एव कीटानुविद्धरत्नादेः साधारण्येन काव्यता दुष्टेष्वपि मता, यत्र रसाद्यनुगमः स्फुटः इति सङ्गच्छते इति प्रत्यपादि । परमेतन्मतमपि न युक्तियुक्तं प्रतीयते यदि रसात्मकस्य काव्यत्वं स्वीक्रियेत तदा रसाभावाद्यात्मकं काव्ये वस्त्वलङ्कारप्रधानेषु काव्येषु च अव्याप्तिः स्यात्, इष्टापत्तौ तु महाकविसम्प्रदाय-भङ्गापत्तिः ।

यत्तु ध्वनिकारः, 'काव्यस्यात्मा ध्वनिः' इति प्रत्यपीपदत् तन्न मनोरमम् । वस्त्वलङ्कारभेदात् त्रैविध्यम् अञ्चति, ध्वनौ रसध्वनेः काव्यत्वे न कश्चिद् दोषः । वस्त्वलङ्काररूपध्वनियुक्तं काव्यं स्यात् तदा प्रहेलिकादौ अतिव्याप्तिः स्यात् । तस्मात् ध्वनिकारोक्तलक्षणमपि नादरणीयम् ।

'रीतिरात्मा काव्यस्य' इति वामनमतमपि न साधीयः प्रतीयते । यतो हि 'विशिष्टपदरचनारीतिः' इति स्वयं वामनेन रीतिलक्षणं प्रतिपादितम् । परञ्च शब्दविशेषः शब्दश्च काव्यस्य शरीरम्, तत् कथमात्मा भवितुमर्हति ।

"वक्रोक्तिः काव्यजीवितम्" इति वक्रोक्तिकारोक्तमतमपि खण्डितं भवति । यतो हि वक्रोक्तेः अलङ्काररूपत्वात् आत्मनश्च तद्भिन्नत्वात् । अतः सर्वापेक्षया मम्मटोक्तकाव्यलक्षणमेव युक्तियुक्तमर्हमिति प्रतिभाति । न च मम्मटोक्तलक्षणे अदोषावित्यस्य दोषसामान्याभाववन्तौ, इत्यर्थो गृह्येत् तदा निःशेषच्युतचन्दन-मित्यत्र विधेयाविमर्शदोषदुष्टतया काव्यत्वानापत्तिरिति वाच्यम्, । यदंशावच्छेदेन दोषः तदंशं परित्यज्य भागान्तरोदाहरणे एव तदभिप्रायेण दोषाभावात् । न च गुणानां रसधर्मतया शब्दार्थयोः सगुणाविति विशेषणमनुपयुक्तमिति वाच्यम् ।

गुणवृत्त्या पुनस्तेषां वृत्तिः शब्दार्थयोः मता इति गुणस्य रसवृत्तित्वेऽपि तद्-व्यञ्जकपरतास्वीकारेण दोषाभावात् ।

एवं विविधकाव्यलक्षणेषु कस्यापि सर्वसम्मतं काव्यलक्षणमिति वक्तुम् अद्यापि दुष्करमेव ।

तत् काव्यं द्विविधं दृश्यश्रव्यभेदात् । अत्र श्रव्यकाव्यं, पद्यकाव्यं वा महा-काव्यं, खण्डकाव्यं तथा मुक्तककाव्यभेदात् त्रिविधं भवति ।

महाकाव्यलक्षण तथा—

सर्गबन्धो महाकाव्यं, तत्रैको नायकः सुरः ।
सद्वंशः क्षत्रियो वापि, धीरोदात्त-गुणान्वितः ॥
एकवंशभवाः भूपाः, कुलजा बहवोऽपि वा,
शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते ।

अङ्गानि सर्वेऽपि रसाः सर्वे नाटकसन्धयः ।
इतिहासोद्भवं वृत्तम् अन्यद् वा सज्जनाश्रयम् ॥
चत्वारस्तस्य वर्गाः स्युस्तेष्वेकं च फलं भवेत् ।
आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा ॥
क्वचिन्निन्दा खलादीनां सतां च गुणकीर्तनम् ।
एक वृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः ॥
नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह ।
नाना वृत्तमयः क्वापि सर्गः कश्चन दृश्यते ॥
सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत् ।

इत्यादि । उदाहरणं यथा—रघुवंशम्, शिशुपालवधम्, नैषधमित्यादि ।

(११) प्रश्नः—महाकविकालिदासस्य स्थितिकालविषये विदुषां मतं प्रदर्श्य अत्र सन्दर्भे स्वमतं प्रकटयत ।

उत्तरम्—इदं खलु सर्वविदितं विद्यते यत् कालिदासस्य स्थितिकालसम्बन्धी प्रश्नः बहुविवादग्रस्तोऽस्ति ।

भारतीयजनश्रुत्यनुसारेण कालिदासः विक्रमादित्यस्य सभायां नवरत्नेषु प्रधानभूतो कविरासीत् । कालिदासस्य ग्रन्थेनापि विक्रमादित्यस्य सहवासः सिद्ध्यति । यथा शाकुन्तले "अभिरूपभूयिष्ठा परिषद्" इति शब्देन एवं विक्रमोर्वशीये, नायकः पुरुरवास्ति तथापि नाटकस्य नामकरणे विक्रमशब्दप्रयोगेण "अनुत्सेकः खलु विक्रमालङ्कारः", इत्यादि प्रमाणैः विक्रमादित्यस्य सहवासः सिद्ध्यति ।

विशेषतः कालिदासस्य स्थितिकालविषये मुख्यतया त्रीणि मतानि सन्ति । तथाहि—

(१) फर्गुसन महोदयः—उज्जयिनीनृपवर्य विक्रमादित्यः वेदवेदबाण-(५४४) ईस्व्यां श्रीविक्रमादित्यः "कुहरूर" युद्धे शकान् विजित्य स्वकीय-नाम्ना विक्रमसम्वत्सरं चालयामास । अतः कालिदासस्य स्थितिकालः षष्ठ-शताब्द्यां भवितुमर्हतीति स्वीकरोति । कालिदासस्य ग्रन्थेषु यवन-शक-हूणजातीनां नामानि प्राप्यन्ते । हूणैः (५००) ईस्व्यां भारते आक्रमणं कृतम्, अनेन प्रतीयते यत् कवेः समयः अस्य पश्चादेवासीदिति ।

मतमिदं समीचीनं न प्रतिभाति । यतो हि वेद-वेद-बाण (५४४) ईस्व्यां नन्द-नेत्र-शर (५२९) ईस्व्यां मालवसम्वत्सरः, शून्यवह्नि-वेद, (४३०) ईस्व्यां विक्रमसम्वत्सर इति संख्याकप्रयोगाः प्राप्यन्ते । चीनस्य मध्येशियायाश्चेति-

हासेषु लिखितमस्ति यत् ईस्वी पूर्वं प्रथमायां द्वितीयस्यां वा शताब्द्यां हूणजातिः पामीरस्य पूर्वोत्तरभागे प्राविशत् ।

(२) द्वितीयमतं गुप्तकालीनमस्ति । यूरोपीया विद्वांसः गुप्तनरपति-साम्राज्यकाले कालिदासस्य स्थितिकालं स्वीकुर्वन्ति । कालिदासः कुमारसम्भवम्, चन्द्रगुप्तपुत्रस्य श्रीकुमारगुप्तस्य जन्म लक्षीकृत्य अरीरचत् । चतुर्थशताब्द्यां हरिषेणकृतप्रयागप्रशस्तौ—' ज्योतिष्मती चन्द्रमसेव रात्रिः, इन्दुः नवोत्थानमिवोन्दुमत्यै'' इत्यादि सूक्तिभिः अनुमीयते यत् कालिदासस्य स्थितिकालः द्वितीयचन्द्रगुप्तस्य समये मन्तव्य इति ।

एतदपि मतं न रुचिकरं प्रतिभाति । यतो हि प्रथमचन्द्रगुप्तः स्वयं सम्वत्सरं चालयामास । तत्पश्चात् द्वितीय चन्द्रगुप्तः स्वपितामह-चलित-सम्वत्सरं निरस्य निजनाम्ना सम्वत्सरं सञ्चालयामास, इत्यसङ्गतं भवति । विक्रमसम्वत्सरस्योल्लेखः नवमशताब्द्याः पूर्वं कुत्रापि नोपलभ्यते ।

(३) तृतीयमतमित्थं वर्तते यत् महाराज विक्रमादित्यः उज्जयिन्यां नगर्यां राज्यमकार्षीत् । यः शकान् विजित्य सप्तपञ्चाशत् ईस्वी पूर्वं विक्रमसम्वत्सरं सञ्चालयामास । अतः कालिदासस्य समयः प्रथमशताब्द्यां मन्तव्य इति उपर्युक्तानि मतानि विविच्य कालिदासस्य स्थितिकालः ईस्वीपूर्वं प्रथमशताब्द्यामेव मन्तव्य इति युक्तियुक्तं प्रतिभातीति ।

(१२) प्रश्नः—महाकविकालिदासस्य सर्वाः कृतीः वर्गीकृत्य तद्गतकाव्यशैलीं विश्लेषयत ।

उत्तरम्—विदितमेव सर्वेषां विदुषां यत् कालिदासस्य रचनायाः परिगणनमतिदुष्करम् । यतो हि काव्यक्षेत्रे कालिदासस्य ख्यातिं विलोक्य बहवः कवयः कालिदासाभिधेयेन काव्यमरीरचन् । राजशेखरः त्रयाणां कालिदासानां सत्तां स्वीकरोति । तथापि विद्वांसः महाकविकालिदासस्य सम्प्रति एताः कृतीः प्रमाणीकुर्वन्ति—(१) ऋतुसंहारः, (२) कुमारसम्भवम्, (३) मेघदूतम्, (४) रघुवंशम्, (५) अभिज्ञानशाकुन्तलम्, (६) मालविकाग्निमित्रम्, (७) विक्रमोर्वशीयम् ।

(१) आसु सर्वासु कृतिषु ऋतुसंहारः, कालिदासस्य प्रथमा कृतिरिति विद्वद्भिः स्वीक्रियते । षट्सु सर्गेषु विभक्तमिदं काव्यं ग्रीष्मादारभ्य वसन्तं यावत् षण्णाम् ऋतूनां स्वाभाविकं सरलं च वर्णनं प्रस्तौति ।

(२) 'कुमारसम्भवम्' कवेः सन्दिग्धा कृतिः वर्तते । सम्प्रति काव्यस्य

सप्तदश सर्गाः प्राप्यन्ते । परन्तु आदितः अष्टमसर्गान्तमेव कालिदासस्य कृतिः स्वीक्रियते । यतो हि सूक्तसङ्ग्रहकारकाः तथालङ्कारविवेचकाः अष्टमसर्गान्तस्यैव पद्यानि उद्धरन्ति । मल्लिनाथेनापि अष्टानां सर्गाणामेव सञ्जीवनी नाम्नी टीका कृता । अन्ये शेषसर्गाः कस्याप्यन्यस्य कवेः रचना प्रतिभान्ति ।

(३) मेघदूते कालिदासस्यानुपमा प्रतिभा समुल्लसति । वियोगविधुरायाः कान्तायाः पार्श्वे यक्षस्य सन्देशप्रेषणं कालिदासस्य विचित्रकल्पना दृश्यते । रामायणे श्रीरामः हनुमन्तं दूतं विधाय सीतायाः समीपे प्रेषयति इति रामायणीं कथामादाय तथा महाभारतीयां हंसदूतकथामादाय वा कालिदासः ईदृशीं कल्पनामकरोदिति प्रतीयते ।

(४) विद्वांसः 'रघुवंशम्' कालिदासस्य सर्वश्रेष्ठं काव्यं स्वीकुर्वन्ति । काव्येऽस्मिन् एकोनविंशतिसर्गाः सन्ति । कालिदासेनात्र निजकवित्वशक्तिः यत्र तत्र साधु प्रकटिता । गिरिवनोपवनवर्णनेषु कवेः प्रकृत्यनुरागः प्रकटीभवति ।

(५) "मालविकाग्निमित्रम्" कालिदासस्यैतिहासिकं नाटकं विद्यते । मालविकाग्निमित्रयोः प्रणयं लक्ष्यीकृत्य तथैतिहासिककथामाश्रित्य च कविना साधु शैल्यां नाटकमिदं रचितम् ।

(६) विक्रमोर्वशीये कालिदासः वैदिक-प्रणय-गाथामादाय पुरुरव-उर्वश्योः प्रणय-चित्रणं कमनीयशैल्या प्रस्तौति । प्राचीनतरापि प्रणय-कथा कवि-प्रतिभया चमत्कारिका मनोहरा च जाता । ग्रन्थेऽस्मिन् कवित्वशक्तेरधिकप्रभावः दृश्यते । नाटकीयतत्त्वस्य निर्वाहः गौणतयैव जातः ।

(७) कालिदासस्य नाटकेषु "अभिज्ञानशाकुन्तलम्" प्रसिद्धतमं सर्वश्रेष्ठं नाटकं गण्यते । समालोचकाः "काव्येषु नाटकं रम्यं, तत्र रम्या शकुन्तला" इत्युक्त्वा नाटकस्य सर्वश्रेष्ठत्वं स्वीकुर्वन्ति । विदेशीया अपि नाटकस्यास्य सर्वश्रेष्ठत्वं प्रकटयन्ति । अनेन प्रकारेण कालिदासस्य कविता संस्कृत-साहित्ये देववाण्याः श्रृङ्गार इव प्रतीयते । माधुर्यगुणस्य मधुरत्वं, प्रसादस्य स्निग्धत्वं, पदानां सरसत्वम्, अर्थानां सौष्ठवम्, सालङ्कारिकशब्दानां मञ्जुलप्रयोगाः, कालिदासस्य महाकवित्वं प्रकटयन्ति ।

भारतीयसंस्कृतेः प्रतिनिधिरयं कविः अस्य पात्राणि भारतीयतायाः भव्यविभूतिरिव प्रतिभाति ।

(१३) प्रश्नः—"उपमा कालिदासस्य" इत्याभाणकं युक्तियुक्तं विवेचनीयम् ।

उत्तरम्—कविः कालिदासः प्रतिभासम्पन्नकविरासीत् । स्वकीय-काव्यानां शैल्याः निर्माणं स्वयमेव कृतवान् कविः । रसमय्याः पद्धतेः सुकुमारमार्गस्य च प्रवर्तकोऽयं कविः । भावोदात्ततायाः सञ्चाराय सालङ्काराणां शब्दानां प्रयोगम्, औचित्यानुसारेण करोति । सर्वेष्वलङ्कारेषु कालिदासस्योपमा संस्कृतसाहित्ये प्रसिद्धाऽस्ति । भावप्रदर्शनाय यादृशी उपमा कालिदासस्य भवति, न तादृशी केषाञ्चित् कवीनामिति । अस्य कवेः उपमा चलचित्रमिव चित्रमङ्कयति ।

अतः भारतीयसमालोचकानामाभाणकमिदम् उपमा कालिदासस्य इति सत्यं प्रतिभाति ।

अन्येषामपि कवीनामुपमायाः सत्त्वे कालिदासस्यैवोपमायाः वैशिष्ट्ये किं बीजम् ? कालिदासस्योपमानोपमेययोः समानलिङ्गकत्वस्य समानविभक्तिकस्य च प्रयोगादन्यापेक्षया वैशिष्ट्यं बोध्यते ।

कुमारसम्भवे कवेरुपमा रसात्मकतायाः कीदृशी मर्मस्पर्शिनी विद्यते । तपस्तप्तुं सर्वमाभूषणं विहाय वल्कलधारिणीं पार्वतीं ताराचन्द्रिकायां मण्डिता अरुणोदया रात्रिरिव चित्रयति । एवञ्च तृतीयसर्गे स्तनभारेण नम्रां रक्तवस्त्र-धारिणीं पार्वतीं पुष्पस्तवकावनम्रां सञ्चारिणीं लतामिव चित्रयति । तथा हि—

"पर्याप्तपुष्पस्तबकावनम्रा सञ्चारिणी पल्लविनी लतेव" ।

रघुवंशमहाकाव्ये समागतान् नरपतीन् विहाय स्वयम्वरे इन्दुमती कीदृशी प्रतीयते ? इति दृश्यताम्—

"सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिम्वरा सा ।
नरेन्द्रमार्गाट्ट इव प्रपेदे, विवर्णभावं स स भूमिपालः ॥"

कालिदासस्योपमायाः इयं विशेषतास्ति यत् चक्षुषोरग्रे चित्रमिवाङ्कयति । विक्रमोर्वशीये कालिदासस्य प्रकृतिगर्भोपमा कीदृशं चित्रं प्रस्तौति । निरीक्ष्य-ताम्—

आविर्भूते शशिनि तमसा मुच्यमानेव रात्रिः
नैशस्यार्चि हुतभुग् इव छिन्नभूयिष्ठ धूमाः ।
मोहेनान्तर्वरतनुरियं लक्ष्यते मुक्तकल्पा
गङ्गारोधःपतनकलुषा गृह्णतीव प्रसादम् ॥

एवं कालिदासस्य मनोहरा सर्वश्रेष्ठोपमा काव्ये यत्र तत्र सर्वत्रापि च निज-वैशिष्ट्यं तनोति । अतः सत्यमुक्तम्, "उपमा कालिदासस्य" ।

(१४) प्रश्नः—काव्यकलादृष्ट्या महाकविकालिदासस्य काव्य-गतवैशिष्ट्यं विवेचनीयम् ।

उत्तरम्—कालिदासस्य कविता संस्कृतसाहित्यस्य शृङ्गारो विद्यते। माधुर्यस्य सुमधुरसन्निवेशः, प्रसादस्य स्निग्धता, सरसपदविन्यासः, अर्थगौरवम्, अलङ्कारस्य मञ्जुलप्रयोगः, एतत् सर्वमपि काव्यस्य महनीयलक्षणं कालिदासस्य कवितासु पदे-पदे दृश्यते। कालिदासः भारतीयसंस्कृतेः प्रतिनिधिः, अत एवास्य पात्रं भारतीयतायाः प्रतिमूर्तिः। यस्मिन् कवौ जीवनसम्बन्धिमार्मिकस्थल-निरूपण-शक्तिः भवति, स एव जनतायाः प्रतिनिधिः कविः भवितुमर्हति। प्रातिनिध्यं च कर्तुं शक्नोति नान्यः।

कालिदासः निजकाव्ये भारतीयसमाजस्य चरित्रचित्रणे तथा नाटके पात्रस्य तदनुरूपाभिनयप्रदर्शने सिद्धहस्त आसीत्। कतिपयेषु शब्देषु भावं प्रकटनं कालिदासस्यालौकिकी प्रतिभाऽऽसीत्। कृतस्पर्शमात्रेणैव मनोहरं करोति विषयं कालिदासः। औचित्यस्याद्वितीयो मर्मज्ञः कालिदासः, नात्र संशयः। वर्ण्यविषयं याभिः कलाभिः रुचिरं चारुतरं च भवेत्, ताभिरेव प्रकटनं कालिदासस्य भावुकतां परिचाययति।

अस्य काव्ये हृदयपक्षस्य प्राधान्यं विद्यते। परिवर्तनशीलस्य मानवहृदयगतभावस्याभिव्यक्तौ कालिदासस्याद्भुतं कौशलं दृश्यते। स्वतन्त्रः प्रतिभासम्पन्नश्चायं कविः। अत एव काव्यशैलीनिर्माणे नान्येषां कवीनाम् अनुकरणं करोति। रसमयपद्धतौ सुकुमारमार्गे च, भावस्य तीव्रतां उदात्ततां चानेतुं अलङ्कारस्य प्रयोगः औचित्यानुसारेण भवति कालिदासस्य। अस्यौचित्यं विलोक्य, उपमा कालिदासस्य, इत्याभाणकं सत्यमेव प्रतीयते। कालिदासस्योपमासु लोकव्यवहारस्य प्रकृतेश्चापूर्वं सामञ्जस्यं दृश्यते। बाह्यान्तरचित्रणे कालिदासस्योपमा विलक्षणं चमत्कारं समुत्पादयति। रसनिरूपणेऽपि कालिदासोऽद्वितीयः। शृङ्गारस्य द्वयोः पक्षयोः सम्भोगविप्रलम्भयोः चित्रणे महाशिल्पी कालिदासः। कुमारसम्भवस्य चतुर्थसर्गे कामपत्न्याः रत्याः विलापः रघुवंशस्य अष्टमे सर्गे अजाय इन्दुमत्याः विलापश्च कालिदासस्य करुणरसप्रवीणत्वं प्रकटयति।

मेघदूतं वियोगविधुरस्य यक्षस्य अचेतनमेघद्वारा प्रियासन्निधौ सन्देशप्रेषणं कालिदासस्यातिचमत्कारपूर्णा कल्पना कथ्यते।

यक्षपत्न्याः सकरुणवर्णनमधीत्य केषां सचेतसां चित्तं न द्रवति। एवं हि काव्ये यत्र तत्र सर्वत्रानेकस्थले कालिदासस्य विलक्षणा प्रतिभा काव्यवैशिष्ट्यं तनोति क्वान्तं वर्णयामः। कालिदासस्य प्रतिभा सर्वथा विलक्षणैव प्रतिभाति।

(१५) प्रश्नः—भवभूतेः साहित्यिकजीवनपरिचयो दीयताम्।

उत्तरम्—के सन्ति एतादृशाः संस्कृतज्ञाः ये भवभूतिनाम्ना परिचिताः न भवेयुः। संस्कृतनाटयकारेषु भवभूतेः महती प्रसिद्धिरस्ति। महाकविकालिदासस्य यदि कोऽपि तुलामर्हति तर्हि स भवभूतिरेव। न केवलं कालिदासस्य तुलामेवार्हति अपि तु कतिचिदंशेषु विशिष्टं स्थानं भजते। आसीत् संस्कृत-नाटय-साहित्यस्याद्भुतः शिल्पी भवभूतिरिति नात्र संशयः। मानवहृदयविकारान् यथाऽयं कविः जानाति स्म तथा विरला एवैतादृशाः कवयः दृश्यन्ते। महावीरचरितस्य प्रस्तावनानुसारेण भवभूतिः विदर्भदेशान्तर्गत "पद्मपुर"नगरस्य निवासी आसीत्। कृष्णयजुर्वेदस्य तैत्तरीयशाखाध्यायी काश्यपगोत्रीयो ब्राह्मण आसीत्। पिता श्रीनीलकण्ठः माता च जतूकर्णी पितामहश्च भट्टगोपालाभिध आसीत्। वेदाध्यायी कर्मकाण्डी चास्य पूर्वजः। श्रीकण्ठपदलाञ्छनो भवभूतिर्नाम इति स्वयं समालिखत्। अतः केषाञ्चित् विदुषां मतमस्ति यत् अस्य नाम श्रीकण्ठ आसीत्, परमनेन साहित्यिकोपाधिना भवभूतिः इति नाम्ना प्रसिद्धिः प्राप्तेति।

"साम्बा पुनातु भवभूति-पवित्रमूर्तिः" इति स्वयं कविः समालिखत्। अतो भवभूति नाम्नास्य ख्यातिरस्ति। वेददर्शनयोरगाधोऽयं पण्डितः। अस्मिन् नाटके विविधस्थले वैदिकज्ञानगरिम्णः प्रभावो दृश्यते। ललितादित्यनरेशस्याश्रयत्वात्, तथा काव्यालङ्कारसूत्रे श्रीवामनाचार्येण एतत्कविनिर्मितपद्योद्धृतत्वात् अस्य कवेः समयः अष्टमशतकस्य पूर्वार्धेऽस्तीति स्वीकुर्वन्ति।

भवभूतेः संस्कृतसाहित्ये ख्यातिप्राप्तानि एतानि नाटकरत्नानि सन्ति। (१) मालतीमाधवम्, (२) महावीरचरितम्, (३) उत्तररामचरितश्चेति। भवभूतेः नाटकेषु नाटचकलायाः देदीप्यमानानि उदाहरणानि विद्यन्ते। उत्तररामचरिते अस्य चरमान्तं चमत्कारं प्राप्यते। भवभूतेः करुण-रस-चित्रणं विलोक्य श्रीगोवर्धनाचार्येणोक्तम्, यथा—

> "भवभूतेः सम्बन्धात् भूधरभूरेव भारती भाति।
> एतत्कृतकारुण्ये किमन्यथा रोदिति ग्रावा॥"

(१६) प्रश्नः—महाकविभवभूतेः नाटचकलायाः समीक्षा कार्या।

उत्तरम्—श्रीभवभूतिः प्रतिभासम्पन्नो भावुकश्च कविः। स्वभावेनायं गम्भीराकृतिरिति लक्ष्यते। अतः स्वानुभूत्या संसारस्य वेदनाविषादं ज्ञात्वा सारस्वतसृष्टौ यादृशं मार्मिकप्रसङ्गं सकरुणेन रसेनायं कविः वर्णयति न तादृशं वर्णनं संस्कृतसाहित्यस्यान्यस्मिन् नाटके दृश्यते। त्रिषु नाटकेषु उत्तररामचरितमस्याधिकं प्रशंसनीयं विद्यते। उत्तररामचरितस्य घटनासंयोजने कवेः मनोवैज्ञानिक-

पद्धतिः अतिप्रशंसनीया जाता । एकपत्नीकः श्रीरामो गर्भिणीं सीतां तत्याज । नाटकस्यादौ घटनामिमां सम्भावयितुं भवभूतिना चित्रदर्शनस्य कल्पना कृता । मनोवैज्ञानिकचित्रदर्शनस्य कल्पनया कविः नाट्यकलाप्रदर्शने सफलतां लेभे । तृतीयाङ्के छायारूपिण्याः सीतायाः कल्पना भवभूतेः वैज्ञानिक-कल्पनावैशिष्ट्यं द्योतयति । अपमानिता नारी तावत् पुनः सङ्गमाय न यतते यावत् पत्युः पश्चात्तापेन क्षमायाचनया वा तस्याः सन्तप्तहृदयं शीतलं न भवति । सप्तमाङ्के मनोवैज्ञानिकभावमिदं प्रदर्श्य सीतारामयोः पुनर्मेलनं कारयति कविः ।

नाट्यकलादृष्ट्या नाटकस्य प्रमुखतत्त्वं भवति 'चरित्र चित्रणम्' तत्रापि भवभूतिः सिद्धहस्त आसीत् । विशेषतया सीतारामयोः यादृशमादर्शं चरित्रं भवभूतिः प्रस्तौति, तादृशं विश्वसाहित्येऽपि सुदुर्लभमेव । रामराज्यस्यादर्शं प्रदर्श्य रामस्य चरित्रं कियत् सुन्दरं प्रस्तौति भवभूतिः—

"स्नेहं दयाञ्च सौख्यञ्च यदि वा जानकीमपि ।
आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा" ॥

ईदृशश्चित्तगतभावो यस्य राज्ञो भविष्यति तस्य चरित्रविषये किं कथनीयम् । भारतीयादर्शानुरूपा नारी सीता परित्यक्ताऽपि रामस्य अशुभं न शोचति, अपितु शुभं कल्याणमेव कामयते । परित्यक्ता सीता निजदुःखेन नास्ति दुःखिता, अपितु रामस्यावस्थां दुःखं च दृष्ट्वा चिन्तितास्ति । एतादृश्याः सीतायाः वर्णनं यथा कविः करोति तदा प्रतीयते यत् सीतायाः चित्रं चित्रयति । यथा—

"परिपाण्डुदुर्बलकपोलसुन्दरं दधती विलोलकबरीकमाननम् ।
कारुण्यस्य मूर्तिरथवा शरीरिणी विरहव्यथेव वनमेति जानकी ॥"

सीतारामयोरीदृशमादर्श-चरित्र चित्रणं भवभूतेः नाट्यकलायाः परमवैशिष्ट्यं विद्यते । रसनिरूपणे चायमद्वितीयः । नाटके भाषाभावयोः त्रिवेणीव प्रवहति । हृदयस्य मार्मिक-चित्र-चित्रणमस्य निजीयवैशिष्ट्यं विद्यते । अतः हृदयाकाशे नास्ति ईदृशः शब्दः येनास्य नाट्यकलां प्रदर्शयितुं शक्यते । यथा मूकः फलान्यास्वाद्य तन्मधुरत्वं वक्तुं न शक्नोति तथैवास्य नाट्यकलां विवेचयितुं न शक्यते । भवभूतेः कवित्वशक्तिः करुणरसे एव दृश्यते तत्रापि चास्य प्रतिभा शिखरिणी वृत्ते विशेषतः चमत्करोति सत्यमुक्तं क्षेमेन्द्रेण—

"भवभूतेः शिखरिणी निरर्गलतरङ्गिणी ।
रुचिरा घनसम्बन्धे या मयूरीव नृत्यति ॥

(१७) प्रश्नः—"कारुण्यं भवभूतिरेव तनुते" इत्यस्य सार्थकतां सप्रमाणं निर्णीयताम्।

उत्तरम्—साहित्यदर्पणकारः श्रीविश्वनाथः नाटकं विवेचयन् रसविषयेऽलिखत्—

"एक एव भवेदङ्गी शृङ्गारो वीर एव वा।
अङ्गमन्ये रसाः सर्वे कार्यो निर्वहणोद्भुतम्॥"

अस्यायमाशयः यत् नाटके शृङ्गारो वीरो वैक एव रसोऽङ्गी भवेत्, अन्ये सर्वे रसाः अङ्गमिति मनुते। अस्या रूढेः पालनार्थं केचित् समालोचकाः उत्तररामचरिते विप्रलम्भशृङ्गार एव प्रधानो रस इति स्वीकुर्वन्ति। परन्त्वेतद् न रुचिकरं प्रतिभाति। वस्तुतस्तु भवभूतिना प्राचीनपरिपाटीमुपेक्ष्य करुण-रस-प्रधानं नाटकं रचितम्। यतो हि नाटकेऽस्मिन् प्राचीनपरम्परायाः कतिचिदंशाः विरुद्धाः तथा नवशैलीयुक्ताश्च दृश्यन्ते। कल्पनामिश्रितस्य छायाङ्कस्य सृष्टया स्वाभिमतं प्रकटयति कविः। भवभूतिना नाटके करुणरसे एव अन्येषां रसानामन्तर्भावः कृतः।
यथा—

"एको रसः करुण एव निमित्तभेदात्,
भिन्नः पृथक् पृथगिवाश्रयते विवर्तान्।
आवर्त-बुद्बुद-तरङ्गमयान् विकारान्,
अम्भो यथा सलिलमेव हि तत् समस्तम्॥"

करुणरसस्य कृते कवेः हृदये कीदृशी करुणास्तीति नाटके विलोकनीयम्। यस्य कवेः करुणरसं प्रति एतादृशी भावना भवेत्, तस्य करुणरसवर्णनं कीदृशं भव्यं हृदय-विदारकं स्यादिति स्वयमेवानुमेयम्। एतदेव लक्ष्यीकृत्य श्रीगोवर्धनाचार्येण कथितम्—

"भवभूतेः सम्बन्धात् भूधरभूरेव भारती भाति।
एतत्कृतकारुण्ये किमन्यथा रोदिति ग्रावा॥"

उत्तररामचरिते करुणो रसः गम्भीरो मर्मभेदकश्चेति दृश्यते। अस्मिन् विषये स्वयमेव कविना उक्तम्—

"अनिर्भिन्नो गभीरत्वात् अन्तर्गूढघनव्यथः।
पुटपाकप्रतीकाशो रामस्य करुणो रसः॥"

वैदेहीनिर्वासानन्तरं तद्वियोगे श्रीरामस्य या दशा भवभूतिना वर्णिता सा दशा स्वयमेव करुणरसविषये किमपि भणति—

"दलति हृदयं शोको वेगात् द्विधा न तु भिद्यते ।
वहति विकलः कायो मोहं न मुञ्चति चेतनाम् ॥"

इत्यादि कारुण्यमयपद्यं केषां सचेतसां हृदयं करुणरसतरङ्गिण्यां न प्रवाहयति। किं बहुना—उत्तररामचरिते कविना करुणरसस्य वेगवती धारा प्रवाहिता। करुणरसपरिपूर्णमिदं नाटकं संस्कृतसाहित्यस्याक्षयो निधिरस्ति। नाटकेऽस्मिन् करुणरसमन्दाकिन्याः प्रवाहे वियोगसन्तापः सर्वथा निमज्जति। भवभूतेः करुणरसस्यैतादृशीं प्रतिभां विलोक्यैव येन केनापि सहृदयेन प्रोक्तम्—"कारुण्यं भवभूतिरेव तनुते" इति।

(१८) महाकवेः अश्वघोषस्य स्थितिकालं जीवनचरितं च विलिख्य तस्य काव्यशैलीं समालोच्यताम्।

उत्तरम्—हृदयगतभावनाया उद्बोधिका भवति कविता। कविता मानवहृदयमुत्तेजयति समाकर्षति च। अतः प्राचीनकालादेव मानवः धर्मस्य स्वोद्देश्यस्य च प्रचाराय कवितायाः आश्रयं गृह्णाति। महाकविः अश्वघोषोऽपि बौद्धधर्मप्रचाराय काव्यं विरचितवान्। सौन्दरानन्दस्यान्ते कविना स्वयमेवोक्तम्—यथा तिक्तौषधिं पानाय मधुना सम्मेलयते तथैवाहं धर्मप्रचाराय काव्यस्याश्रयं गृहीतवानस्मि। अत एव अश्वघोषस्य काव्यकृतिः बौद्धधर्मस्य दार्शनिकविचाराणां प्रचारिका विद्यते। तथापि अश्वघोषः प्रकाण्डविद्वानासीत् नात्र संशयः। बौद्धदर्शनेषु बौद्धसिद्धान्तस्यायं कविः आचार्य एवासीत्। अस्यैते प्रामाणिका ग्रन्थाः सन्ति—बुद्धचरितम्, सौन्दरानन्दम्, शारिपुत्रप्रकरणञ्चेति। अन्ये ग्रन्थाः अन्तर्बाह्यप्रमाणाभ्यामनेन रचिताः न प्रतीयन्ते। काव्ये कतिचिदंशाः सरसाः काव्यकलादृष्ट्या चोत्तमाः विद्यन्ते। परिशेषास्तु नीरसा एव।

जीवनचरितं स्थितिकालश्च—

अश्वघोषस्य जीवनचरितविषये अद्यापि विद्वांसः सन्देहापन्ना एव। तथापि सौन्दरानन्दस्य पुष्पिकया एतत् प्रमाणितं भवति यत् अश्वघोषः साकेतस्य (अयोध्यायाः) निवासी आसीत्। सुवर्णाक्ष्याः पुत्रोऽश्वघोषः तार्किकः रामायणमहाभारतयोः विशेषज्ञश्चासीत्। सौन्दरानन्दस्य पुष्पिकायामेवं लिखितमस्ति "आर्यसुवर्णाक्षीपुत्रस्य साकेतकस्य भिक्षोराचार्यस्य भदन्ताश्वघोषस्य महाकवेः वादिनः कृतिरिति" अनेन प्रमाणेन प्रायः साकेतनिवासी सुवर्णाक्षी-पुत्र इति च सिद्ध्यत्येव राज्ञा कनिष्केन सह सम्बद्धः मातृचेटकविषु अश्वघोषस्य कवितायाः प्रभावो दृश्यते, अतः कनिष्कस्य समकालीनः किञ्चित् पूर्ववर्ती वाऽश्वघोष इति

स्वीक्रियते । अतः अश्वघोषस्य स्थितिकालः प्रथमायाः शताब्द्याः पूर्वार्धे (१५० ईस्वीपूर्व) सामान्यतः मन्यते ।

(१९) प्रश्नः—कालिदासाश्वघोषयोः तुलना कार्या ।

उत्तरम्—नाविदितं केषाञ्चित् विदुषां यत् महाकविकालिदासस्य लेखनी सर्वतोमुखी आसीदिति । नाट्यकलायां, काव्ये, गीतिकाव्ये, सर्वत्र कालिदासस्य प्रतिभा सर्वातिशायिनी वर्तते । संस्कृतवाङ्मयस्य महाकवयोऽपि कालिदासं संस्कृतसाहित्यस्य मूर्धन्यं मन्यन्ते ।

महाकविः अश्वघोषः वैदिकसाहित्यस्य धुरन्धरो विद्वान् आसीत् । रामायण-महाभारतयोश्चायं ज्ञाता । अश्वघोषस्यैते प्रामाणिकाः ग्रन्थाः सन्ति । बुद्धचरितम्, सौन्दरानन्दम्, शारिपुत्रप्रकरणञ्चेति । काव्ये बुद्धस्योपदेशाः वर्णिताः सन्ति । अश्वघोषः, काव्यकलादृष्टया काव्यं न निर्मितवान् । बुद्धस्योपदेशस्य प्रचाराय प्रसाराय वा काव्यमरीरचत् । तथापि काव्ये कतिचिदंशाः काव्यकलादृष्टया नितरां प्रशंसनीयाः रसात्मकाश्च सन्ति । परिशिष्टं सर्वमेव नीरसं विद्यते ।

यतो हि कवेरुद्देश्यं धर्मप्रचारायासीत् न तु काव्यनिर्माणार्थम् । अतः काव्ये काव्यकला गौणी जाता । तथापि अस्माकं समक्षे द्वावेव महाकवी समकक्षता-मधिगच्छतः । केषाञ्चित् विदेशीयानां विदुषां विचारोऽस्ति यत् कालिदासस्य कृतयः जनतायाः अभिरुचिं नोत्पादयामासुः, परन्तु अश्वघोषस्य कृतयः जनतायाः अभिरुचिं समाचकर्षुः ।

केषाञ्चित् विदुषाम् इदमपि कथनं विद्यते यत् कालिदासः अश्वघोषस्य भावनामाललम्बे । परन्त्वेतत् सर्वथानुचितमेव नात्र संशयावकाशः ।

यदि वयं कालिदासाश्वघोषयोः ग्रन्थं विलोकयामः समालोचयामश्च विषयं तर्हि काव्यकलादृष्टया कालिदासस्य प्रभावेण अश्वघोषः प्रभावित इति लक्ष्यते । अश्वघोषः कथानकसृष्टिं, वर्णनशैलीम्, अलङ्कारछन्दोभावनामवश्यमेव कालि-दासस्य जग्राह ।

रचनादृष्ट्यापि कालिदासः श्रेष्ठः कविः प्रतीयते । अश्वघोषस्य बुद्धचरितम्, सौन्दरानन्दम्, इति काव्यद्वयमेवोपलभ्यते । कालिदासस्य महाकाव्यं, खण्ड-काव्यं, गीतिकाव्यं, नाटकञ्चेत्यादयः कृतयः प्राप्यन्ते । अतः समालोचकदृष्ट्या कृतायां, समालोचनायां कालिदासः श्रेष्ठः कविः प्रतिभाति । इति ।

(२०) प्रश्नः—"काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला" इत्याभाणकस्यौचित्यं प्रकटनीयम् ।

उत्तरम्—द्विविधं काव्यं दृश्यं श्रव्यञ्च । दृश्यं नाटकं रूपकञ्चेति कथ्यते । "अवस्थानुकृतिर्नाटयं तदारोपात्तु रूपकम्" इति शब्देनाचार्येण अनयोः दृश्य-रूपकयोः व्याख्या व्यधायि । श्रव्यकाव्यापेक्षया दृश्यकाव्यं रम्यं भवतीति सर्व-विदितं विद्यते । यतो हि दृश्यकाव्ये गद्यपद्ययोः कथोपकथनयोः सम्मिश्रणं भवति । दृश्यकाव्ये सर्वसाधारणोऽपि समाजः तद्गतदृश्यचित्राभिनयदर्शनेन, काव्यानन्दमनुभवितुमर्हति । परन्तु श्रव्यकाव्ये काव्यमर्मज्ञाः विद्वांस एव तस्या-नन्दमनुभवितुं शक्नुवन्ति । संगीतशास्त्रस्याधिक्यादपि दृश्यकाव्यं वैशिष्ट्यं भजते । संगीतस्य तानलयादितारतम्ये कदाचिदेतादृशी शक्तिरस्ति यया पशु-पक्षिणोऽपि मुह्यन्ति । तर्हि का कथा चैतन्यप्रधानानां ज्ञानविज्ञानवतां मानवाना-मिति । नाटके नृत्यसंगीतयोः समावेशः प्रायः भवत्येव । अतः काव्येषु नाटकं रम्यमिति कथनं सर्वथा युक्तियुक्तं प्रतिभाति ।

तत्र नाटकेऽपि शकुन्तला रम्येति कथ्यते । संस्कृतनाटकरत्नेषु अभिज्ञान-शाकुन्तलं नाटकं हीरकमिव संस्कृतसाहित्ये चकास्ति । सर्वप्रथमं नाटकस्यास्य नामकरणमतीवोद्देश्यपूर्णं विद्यते । तथा हि—अभिज्ञायते येन तदभिज्ञानं, तेन शकुन्तलामधिकृत्य कृतं पुस्तकम् अभिज्ञानशाकुन्तलम्, इत्यर्थेन नाटकस्य मुख्य-घटनामधिकृत्यास्य नामकरणमतीव सार्थकं जातम् । नाटयशास्त्राचार्याः नाटके येषां नाटकतत्त्वानां परिगणनं कारयन्ति तानि सर्वाणि नाटकतत्त्वानि अभिज्ञान-शाकुन्तले प्राप्यन्ते । परीक्षणालोचनाग्नेरुपरि नाटकतत्त्वनिकषं संस्थाप्य यदि अभिज्ञानशाकुन्तलं परीक्ष्यते तदा सुवर्ण-स्वर्णमिव सर्वाङ्गसुन्दरमिदं नाटकं प्राप्यते । शाकुन्तले शकुन्तलादुष्यन्तयोः प्रेमचित्रणमेव कवेरुद्देश्यम् । नाटकस्य कथावस्तु, प्रेमप्रसङ्गादेवाङ्कुर उद्गच्छति, प्रेमस्देव चान्तो दृश्यते । एवम् आद्यारभ्यान्तं प्रेम-चित्रणैक्यं विलोक्यते ।

दुर्वाससः शापं तथाङ्गुलीयकस्य कल्पना कविकालिदासस्य विचित्रा विद्यते । अङ्गुलीयकस्य कल्पनया नाटकस्य शोभा वर्धतेतमाम् । सामाजिकदृष्ट्यापि नाटकस्य महत्त्वं वरीवृत्यते । यथा गान्धर्वविवाहः समाजस्य कृते नोपयोगीति अधिकृत्यैव कविः शकुन्तलायाः दुर्दशां वर्णयति ।

चरित्र-चित्रणेऽपि नाटकमिदमद्वितीयम् । शकुन्तला-दुष्यन्तयोः, तपोमूर्ते कण्वस्य, प्रियंवदानुसूययोश्च चरित्रं नैजमादर्शं प्रस्तौति । कलादृष्ट्या नाटकस्य महत्त्वमियद् विद्यते यत् विश्वसाहित्ये नाटकमिदं महार्हहीरकमिवास्ति इति कथने नातिशयोक्तिः । सौन्दर्यवर्णने कवेः प्रतिभा सर्वोपरि विद्यते । प्रकृतेः कोमल-सौन्दर्योपासकोऽयं कविः शकुन्तलायाः सौन्दर्यं कीदृशं वर्णयति इति दृश्यताम्—

अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू ।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम् ॥

पित्रा या कन्या जन्मन आरभ्य लालिता पालिता च साधुना पतिगृहं गमिष्यति न तु गच्छति । दुहितुः वियोगसन्तापं सम्भाव्यैव पितुः का दशा भवति इति महर्षेः कण्वस्य मुखारविन्दनिर्गलितं पद्यमिदं कियदौचित्यं समाजे संस्थापयति इति स्वयं विचारणीयम्—

यास्यत्यद्य शकुन्तलेति, हृदयं संस्पृष्टमुत्कण्ठया,
कण्ठः स्तम्भितवाष्पवृत्तिकलुशश्चिन्ताजडं दर्शनम् ।
वैक्लव्यं मम तावदीदृशमपि स्नेहादरण्यौकसः,
पीडयन्ते गृहिणः कथन्नु तनयाविश्लेषदुःखैर्नवैः ॥

एभिः वैशिष्ट्यैः तत्र नाटकेषु शकुन्तला रम्येति कथनं नितान्तं सत्यं विद्यते।

(२१) प्रश्नः—'उत्तरे रामचरिते भवभूतिर्विशिष्यते' अस्याभाणकस्य सत्यता परीक्षणीया ।

उत्तरम्—संस्कृतसाहित्ये सम्मान्यसमालोचकेषु किंवदन्त्येषाः श्रुतिप्रसिद्धास्ति यदेकदा केनापि कालिदासः पृष्टः ? यत् नाटकेषु कस्य वैशिष्ट्यम् ? को वा महान् ? सफलो नाटचकारः भवानस्ति भवभूतिर्वा ?

कालिदासेन समाहितम्—

"नाटके भवभूतिर्वा, वयं वा वयमेव वा ।
उत्तरे रामचरिते भवभूतिर्विशिष्यते ॥"

यद्यपि कालक्रमानुसारेणैवं कथनं नितान्तमसङ्गतं प्रतिभाति, तथापि अस्यां किंवदन्त्यां सत्यार्थं किमस्ति इति न जाने । परन्तु समालोचकाः अस्याः सूक्तेः यथार्थता सिद्धयर्थं कृतप्रयत्नाः भवन्ति । अस्याभाणकस्य युक्तियुक्तविवेचनात् प्राक् द्वयोः तुलनात्मकं विवेचनमावश्यकम् ।

कालिदासः वाग्देव्याः शारदायाः कृपापात्रमासीत् । अस्य प्रतिभा सर्वोपरि दृश्यते । कालिदासः श्रीविक्रमादित्यस्य सभायाः विद्वन्मण्डलेषु देदीप्यमानः सुमेरुः । अतः निजजीवने एव यशः लेभे । जीवनमस्य शान्तं सुखमयश्चासीत् । अत एवास्य कृतिषु कोमलकल्पनायाः प्रसूतानन्दानुभूतिः प्राप्यते ।

राज्याश्रितत्वात् सविलासदृष्टया कविकालिदासः निखिलं जगत् कमनीयमेव पश्यति । अत एवास्य काव्ये सुन्दरतायाः सृष्टिः दृग्गोचरी भवति ।

इतस्तु भवभूतिः वेदोपनिषद्दर्शनादिशास्त्राणां पण्डितः । अत एवास्य

कवितासु प्रखरगाम्भीर्यं दृश्यते । भवभूतिः नैराश्यावस्थायां समयं यापयति स्म । समाजस्याघातं सोढ्वा कवेः हृदयं दुःखेनोच्छ्वसति स्म । जीवनकाले भवभूतिः विविधां विकटविपत्ति सोढवान् । भवभूतेः अन्तःकरणं परिपीडितहृदयस्य नेतृत्वं करोति स्म । अनेनैव कारणेन भवभूतये करुणरसः नितरां रोचते स्म । कालिदासस्यापेक्षयाऽऽन्तरिकदुःख प्रकटने नितरां कुशलो भवभूतिरासीदिति । विशेषतः "उत्तर-रामचरिते" आन्तरिकभावप्रकटने, करुणरसवर्णने च भवभूतेः वैशिष्टयं विलोक्य समालोचकाः कालिदासादधिकं भवभूतिं सम्मन्यन्ते स्म ।

प्रकृति-वर्णने वैशिष्टयम्—कालिदासस्य कृतिषु प्रकृतिवर्णनं सर्वत्रैव सौम्यं सविलासं शृङ्गारात्मकं दृश्यते । कालिदासः प्रकृतिम् उद्दीपनविभावरूपेण चित्रयति । भवभूतिस्तु प्रकृतावपि दुःखं, कारुण्यं, भयानकरूपं च पश्यति । अत एव उत्तररामचरिते प्रकृतेः रौद्ररूपं दृश्यते ।

युद्धवर्णने वैशिष्टयम्—शृङ्गारप्रियः कालिदासः । अस्य काव्ये वीररसवर्णनं स्वल्पमेवास्ति । कुत्रापि वीररसस्याधिक्यं दृश्यते । परन्तु भवभूतेः युद्धवर्णनमधिकं प्रशंसनीयम् । भवभूतिस्तु शब्दध्वनिश्रावणेनैव युद्धस्य स्वरूपं नेत्रयोरग्रे उपस्थापयति । अस्य पद्यपठनेनैव वीररसस्यानुभूतिर्भवति नापेक्षतेऽर्थज्ञानम् । अतः युद्धवर्णने भवभूतेः वैशिष्ट्यं दृश्यते ।

प्रेमचित्रणे वैशिष्टयम्—कालिदासः प्रेमप्रसङ्गचित्रणेऽतिनिपुणः । कालिदासः निजकाव्ये सांसारिकवासनामयं प्रेमाणं वर्णितवान् शाकुन्तले शकुन्तला-दुष्यन्तयोः प्रेमोन्मत्तता वासना च विद्यते । भवभूतिस्तु सर्वत्रैव प्रेमचित्रणे दाम्पत्यमयमादर्शमयञ्च प्रेम चित्रयति । भवभूतेः पात्रं कदापि प्रेमप्रसङ्गे कामजन्यचापल्यं न करोति । उत्तररामचरिते सीतारामयोः प्रेम सांसारिकदाम्पत्य-जीवनप्रणययो आदर्श एवास्ति । भवभूतिः दाम्पत्यमयं प्रेमाणं विधातुः वरदानं मन्यते । "अद्वैतं सुखदुःखयोरनुगतं सर्वास्ववस्थासु या" इत्यादि पद्यमेतदेवार्थं तनोति । अतोऽत्रापि प्रेमचित्रणे कालिदासात् भवभूतिः वैशिष्ट्यं भजते ।

रसनिरूपणम्—शृङ्गारप्रियः कालिदासः करुणप्रियश्च भवभूतिः । दुःखाक्रान्तेभ्यः हृदयेभ्यः करुणरसस्य करुणधारा इव प्रवाह्य भवभूतिः करुणरसस्य आचार्यपदवीमलङ्करोति । करुणरसस्य विषये भवभूतेः उक्तिर्यथा—

"अनिर्भिन्नो गभीरत्वात् अन्तर्गूढघनव्यथः ।
पुटपाकप्रतीकाशो रामस्य करुणो रसः ॥"

उत्तररामचरिते एव करुणरसस्य स्थापनां कृत्वैव भवभूतिः कालिदासात्

सम्माननीयं स्थानं भजते। अतः 'उत्तरे रामचरिते भवभूतिर्विशिष्यते' इति स्वीकारे न काप्यापत्तिर्दृश्यते। इति।

(२२) भवभूतिकालिदासयोः तुलना कार्या।

उत्तरम्—कालिदासः वाग्देव्याः शारदायाः परमकृपापात्रमासीत्। निजप्रतिभया विक्रमादित्यस्य सभां समलङ्कृतवान्। कोमलभावोपासकश्चायं कविः। अतः कालिदासस्य कवितासु प्रातःस्निग्धवायुरिव प्रवाहः, वर्षाकालिकवारिदबिन्दुरिवानन्ददायकसम्पातः प्राप्यते।

भवभूतिस्तु पाण्डित्येन वाग्देव्याः कविताशैलीं प्राप्तवान्। वेदोपनिषद्सांख्ययोगतन्त्रमन्त्राणामभ्यासी चायं कविः, अत एवास्य कवितासु शास्त्रीयपाण्डित्यमधिकं दरीदृश्यते।

विलासप्रियः कालिदासः। अत एवास्य कवितासु हास्यस्य सविलासशृङ्गारस्य च वर्णनमधिकं प्राप्यते। अस्य नाटकेषु च विदूषकस्य स्निग्धं हास्यं दृश्यते।

भवभूतिः स्वभावेनातिगम्भीर इति हेतोरस्य कवितासु हास्यप्रसङ्गा विरला एव। विदूषकोऽभिनेतापि अस्य नाटके न दृश्यते। विदूषकाभावः एनमेवार्थं प्रकटयति। वस्तुतः भवभूतेः प्रणयप्रसङ्गः एतादृशः सुनियन्त्रितोऽस्ति यत् विदूषकस्यावश्यकतैव नास्ति। सीतारामयोः उदात्तचरित्रचित्रणे कविः एतादृशं प्रणयचित्रणं स्वाभाविकमादर्शञ्च चित्रयति यत् विदूषकस्याभावक्षोभो न जायते।

करुणरसपरिपाकः भवभूतेः काव्यकलायाः वैशिष्ट्यं विद्यते। कालिदासस्य कविता सव्यङ्ग्या भवति। अल्पैरेव शब्दैः भावाभिव्यक्तिर्जायते। परन्तु भवभूतेः कवितायाः भावाभिव्यक्तिः अधिकेन शब्देन जायते। अतः वाच्यार्थो भवति भावार्थः। कालिदासस्य शृङ्गारिकरसप्रसङ्गे कामुका वृत्तिः कुत्रचित् स्थाने चाञ्चल्यं विदधाति। राज्ञो दुष्यन्तस्य शकुन्तलां प्रति कथनम् "अये! लब्धं नेत्रनिर्वाणम्" प्रेमचाञ्चल्यं कामवृत्तिं च प्रकटयति। भवभूतिस्तु दम्पतीजन्यं प्रणयं श्रेष्ठतरं मन्यते "अद्वैतं सुखदुःखयोरनुगुणं सर्वास्ववस्थासु यत्" इत्यादिपद्ये कविः दाम्पत्यप्रणयं विधातुः वरदानं प्रकटयति। भवभूतेः करुणरसः अतिमर्मस्पर्शी गम्भीरश्च भवति। करुणरसवर्णने, तथा चित्तगतभावप्रकटने भवभूतिः कालिदासादुन्नतं स्थानं प्राप्नोति। भवभूतिः करुणमेवैकं रसं मन्यते। अन्येषां रसानां तत्रैवान्तर्भावं च स्वीकरोति। एतदनुसारेण करुणपुटपाक इवास्ति। यथा—

"अनिर्भिन्नो गभीरत्वाद् अन्तर्गूढघनव्यथः।
पुटपाकप्रतीकाशो रामस्य करुणो रसः॥

एवं प्रकारेण द्वयोः तुलनया प्रतीयते यत् द्वावेव महाकवी संस्कृतसाहित्यस्य जाज्वल्यमाननक्षत्रे स्तः, परन्तु द्वयोः वैशिष्ट्यं भिन्नमेव प्रतिभाति ।

कालिदासः यदि शृङ्गारवर्णने सर्वानतिशेते तदा भवभूतिः उत्तररामचरिते तथा करुणरसवर्णने कालिदासापेक्षयोच्चैः स्थानस्याधिकारी भवतीति स्वीकारे केषामपि सचेतसां वैमत्यं न भविष्यति । इति ।

(२३) प्रश्नः– महाकविमाघस्य जीवनपरिचयं दत्त्वा तस्य स्थितिकालं निश्चिनुत ।

उत्तरम्—शिशुपालवधमहाकाव्यस्य प्रणेता कविर्माघ आसीत् । 'माघः' इति महाकवेः उपाधिर्नामधेयं वेति विषये प्रसिद्धपाश्चात्यविदुषां 'याकोबी' महाभागानां मतमस्ति यत् यथा भारविः स्वप्रखरप्रतिभा-प्रकाशनार्थं भारविः (भानोः तेजः) इत्युपाधिनाम्नाख्यातिं प्राप्तवान्, तथैव माघोऽपि निजप्रतिभा-दर्शनार्थं "माघ" इति नाम्नः काव्यमरीरचत् । अस्यायमाशयः यत् माघमासे सूर्यस्य किरणाः यथा शक्तिविहीनाः भवन्ति, तथैव माघस्याविर्भूते भारवेः काव्यमपि निस्तेजः जातम् । परन्तु मतमिदं निराधारं प्रतिभाति । वस्तुतस्तु शिशुपालवधस्य रचयितुः नामैव माघ आसीत् । माघकवेः जीवन-घटना-विषये भोजप्रबन्ध-प्रबन्धचिन्तामणीतिग्रन्थ-द्वयाभ्यां परिचयः प्राप्यते । कविः माघोऽपि ग्रन्थादौ निजपरिचयं दत्तवान् । कवेः जन्म गुर्जरप्रान्ते ब्राह्मणवंशेऽभवत् । अस्य पिता दत्तकः विद्वान् दानशीलश्चासीत् । भीलमालनाम्नि नगरे कवेः जन्म जातम् । तत्समये नगरमिदं विद्यायाः प्रधानकेन्द्रमासीत् । कविः माघोऽपि निजपितृवत् दाता दयालुश्चासीत् । श्रूयते एकदा कविपत्नी "कुमुदवनमपश्रि श्रीमदम्भोजखण्डम्" इत्यादि पद्यमादाय भोजराजस्य समीपे गता । राज्ञा भोजेन प्रभूतं धनं तस्यै दत्तं परन्तु सापि वराकी मार्गे एव दरिद्रेभ्यो निर्धनेभ्यः सर्वमपि धनं ददौ । तथापि याचकानां पङ्क्तिः न समाप्ता । याचकानां समूहो यदा कवेः समीपे गतः तदा तस्य पार्श्वे किमपि नासीत् । एतद्दुःखदुःखितो निजप्राणान् तत्याज । किमप्यस्तु दानशीलोऽयं कविरिति निश्चप्रचम् ।

स्थितिकालः–अस्य कवेः स्थितिकालविषये विदुषां मतैक्यं नास्ति । कोऽपि सप्तमशताब्द्याः उत्तरार्धे, कोऽपि च अष्टमशताब्द्यां माघस्य स्थितिकालं निश्चिनोति । वस्तुतस्तु नवमशताब्दीषु आनन्दवर्धनाचार्यः ध्वन्यालोके माघस्य पद्यमुद्धृतवान् अतः माघस्य स्थितिकालः सप्तमशताब्द्याः उत्तरार्धे मन्यते । इति ।

(२४) प्रश्नः—"तावद् भा भारवेर्भाति यावन्माघस्य नोदयः" सप्रमाणमस्य सार्थक्यं प्रदर्शयत ।

उत्तरम्—संस्कृतसाहित्ये काव्यस्य कलायाः शैल्याश्च दृष्ट्या महाकविमाघस्य शिशुपालवधमहाकाव्यं महत्त्वास्पदं स्थानं भजते। एकमेव काव्यं शिशुपालवधं नाम महाकविमाघस्य कीर्तिं संस्कृतसाहित्याकाशे तनोति। महाकविः माघः निजपूर्ववर्तिनः भारवेः काव्यं किरातार्जुनीयं दृष्ट्वा काव्यप्रतिभायां लोकप्रियतायाञ्च भारवेरपि विशिष्टस्थानं प्राप्तुं शिशुपालवधमरीरचत्। अत एव शिशुपालवधे माघस्य प्रतिद्वन्द्विनी भावना लक्ष्यते। भारविः शैव आसीत्, अतः शिववरदान-विषयकं काव्यमलिखत्। वैष्णवसम्प्रदायानुसारी माघः, अतः विष्णुविषयकं काव्यमरचयत्। माघः भारवेः कीर्तिं ध्वंसयितुं यथाशक्तिप्रयत्नं कृतवान्। यथा भारविः काव्यस्यादौ श्रीशब्दप्रयोगं कुर्वन् "श्रियः कुरूणामधिपस्य पालिनीमि"त्यादि पद्यमलिखत् तथा माघोऽपि तदनुकृत्य श्रीशब्दप्रयोगं प्रदर्शयन् काव्यस्यादौ "श्रियः पतिः श्रीमति शासितुं जगत्" इत्यादि पद्यं कृतवान्। एवं विविधप्रसङ्गे विविधस्थले च माघस्य प्रतिद्वन्द्विनी भावना दरीदृश्यते। शिशुपालवधे माघः काव्यविषयकं स्वमन्तव्यं प्रकटयन् शब्दार्थयोः सामञ्जस्यमेव काव्यमिति प्रतिपादयति। एतद् विषयकं कियत् सुन्दरं पद्यं प्रस्तौति माघः। "शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते।" एतन्नयमाश्रित्यैव माघः शिशुपालवधं निर्मितवान्। माघस्यापूर्वास्ति वर्णनशैली। प्रकृति-निरीक्षणशक्तिरपि श्लाघनीया। शिशुपालवधे शब्दालङ्काराणां मधुरो झङ्कारः अस्मन्मनांसि बलादावर्जयति। माघस्यानुप्रासाः मार्मिकाः सप्रभावाश्च विद्यन्ते। कवेः पदलालित्यमपि स्पृहणीयं विद्यते। अग्रस्तनपद्ये पदलालित्यं पश्यतु—

"मधुरया मधुबोधितमाधवी मधुसमृद्धिसमेधितमेधया।
मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे॥"

यद्यपि कविः वीररसचित्रणेऽपि महत् साफल्यं प्राप्तवान्। तथापि माघस्य चित्तं वीररसापेक्षया शृङ्गारेऽधिकं रमते। तथा हि—

"यां यां प्रियः प्रैक्षत कातराक्षी, सा सा ह्रिया नम्रमुखी बभूव।
विशङ्कमन्याः सममाहितेर्ष्यास्तत्रान्तरे जघ्नुरमुं कटाक्षैः॥"

एवं काव्यवैशिष्ट्यं विलोक्य भारवेः काव्यस्य किरातार्जुनीयस्य वैशिष्ट्यमवश्यमेव न्यूनं भवति। अर्थात् संस्कृतसाहित्योद्याने भारवेः काव्यसौरभं तावदेव विलसति यावन्माघस्य शिशुपालवधं मधुमासतुल्यं कमनीयसौरभं न विकिरति।

अतः केषाञ्चित् समालोचकानां कथनमिदं साधु प्रतिभाति यत्—

"तावद् भा भारवेर्भाति यावन्माघस्य नोदयः।"

(२५) प्रश्नः—"माघे सन्ति त्रयो गुणाः" अस्याः सूक्तेः सत्यता परीक्षणीया ।

उत्तरम्—यदा माघस्य काव्यं समुदितं साहित्याकाशे, ततः प्राक् कालिदासस्य "कुमारसम्भवम्", भारवेः "किरातार्जुनीयम्" इति महाकाव्यद्वयं ख्यातिं प्राप्य संस्कृतसाहित्य-रस-रसिकान् भृशमतोषयत् । काव्यमर्मज्ञाः पण्डिताः, विद्वांसः महाकाव्यद्वयमिदं विलोक्य कालिदासस्योपमां, भारवेश्चार्थगौरवं नितरां प्रशशंसुः । तत्पश्चात् यदा माघस्य काव्यं सर्वगुणोपेतं सर्वालङ्कारेणालङ्कृतं, पदलालित्येन ललितम् अर्थगौरवेणातिगरीयः शिशुपालवधं नाम साहित्य-गगने समुदितं, तदा तत् विलोक्य समालोचकाः आश्चर्यचकिता बभूवुः, यत् अहो एकस्मिन्नेव काव्ये त्रयाणां गुणानां सुभगं दर्शनं जातम् । माघस्य कमनीयकवितासु वैशिष्ट्यमेतद् दृष्ट्वैव समालोचकाः प्रोचुः "माघे सन्ति त्रयो गुणाः" इति । काव्यकलादृष्ट्या शिशुपालवधस्य कृतायां समालोचनायां माघस्य विषये यदुक्तं विद्वद्भिः 'माघे सन्ति त्रयो गुणाः' इत्याभाणके सत्यतायां न संशयावकाशः ।

माघस्य कवितासु न भवतु कालिदाससदृश्युपमा परन्तु मनोहारिण्याः उपमायाः अभावोऽपि नास्ति । न वा माघस्य काव्ये अर्थगौरवस्य न्यूनता दृश्यते । माघस्य ललित पद-विन्यासस्तु निश्चितमेव प्रशंसनीयः विद्यते । माघः न केवलं रसिकः कविः अपितु सर्वशास्त्रज्ञः प्रकाण्डविद्वांश्चासीत् । माघसदृशी विद्वत्ता संस्कृतसाहित्ये विरलेष्वेव कविषु दृश्यते । माघः यथा सर्वशास्त्रसिद्धान्तं निजकाव्ये प्रतिपादितवान् न तथा संस्कृतसाहित्यस्यान्यकवीनां काव्येषु दृग्गोचरीभवति । यद्यपि भारवौ राजनीतिपटुता, श्रीहर्षे च दार्शनिकत्वं तत्तत्काव्येषु आभासते परमनयोः पाण्डित्यमेकाङ्गि एव । माघस्य पाण्डित्यं तु सर्वशास्त्रस्य परिचायकं वर्तते । नाट्यशास्त्रालङ्कारशास्त्रयोः व्याकरणसङ्गीतशास्त्रयोश्च माघः प्रकाण्डविद्वानासीत् । माघः निखिलज्ञानराशिभिः स्वकविताकामिनीम् अभूषयत् । यस्य कविता कामिनीषु सर्वोचितालङ्काराणां ललितपदविन्यासानां तथार्थगौरवाणां प्रशंसनीयोपन्यासः दृश्यते । कवेः पदशैय्या ईदृशी सबलास्ति यत् कश्चिदपि शब्दस्थानान्तरं कर्तुं न शक्यते ।

एभिः गुणैः—"माघे सन्ति त्रयो गुणाः" इत्याभाणकस्य सत्यता साधीयसी दृश्यते ।

(२६) प्रश्नः—भारवेः स्थितिकालं निश्चित्य काव्यकलादृष्ट्या संस्कृतसाहित्ये तस्य स्थानं निर्धार्यताम् ।

उत्तरम्—संस्कृतसाहित्ये महाकाव्यकारेषु कालिदासाश्वघोषयोः पश्चात् भारवेः गणना भवति। भारवेः काव्ये किरातार्जुनीये कालिदासस्यानुकरणं दृश्यते। अतः कालिदासस्यानन्तरमेवास्य जन्मजातमिति। माघे भारवेः प्रभावो लक्ष्यते। हर्षचरिते भारवेरुल्लेखो नास्ति, अतः प्रतीयते यत् तत्समये भारविः प्रख्याति नाधिगच्छत्। यत्र कुत्रापि शिलालेखेषु भारवेः नामधेयं प्राप्यते। यथा—

"स विजयतां रविकीर्तिः कविताश्रित-कालिदास-भारवि-कीर्तिः।"

अनेन प्रमाणेन भारवेः स्थितिकालः ६३४ ईस्वीपूर्वात्प्रागेव अवतिष्ट। दक्षिणभारतेऽस्य महती प्रसिद्धिः आसीत्। भारविः त्रावणकोरदेशवासीति केचित् विद्वांसः स्वीकुर्वन्ति। एतेषां मतेन भारवेः स्थितिकालः ६१५ ईस्व्याः समीपतरो भवितुमर्हति। वस्तुतस्तु भारवेः समयः अष्टमशताब्द्यां मन्तव्यः।

भारविणा किरातार्जुनीयमेवैकं काव्यं रचितम्। काव्यस्य कथानकं महाभारतस्य वनपर्वणः गृहीतम्। संस्कृतसाहित्ये बृहत्त्रयीग्रन्थेषु किरातार्जुनीयं ख्यातिप्राप्तं महाकाव्यं विद्यते। काव्यस्याष्टदशसर्गाः सन्ति। प्रतिसर्गान्ते लक्ष्मीशब्दप्रयोगो दृश्यते। भारवेः अर्थगौरवं संस्कृतसाहित्ये प्रसिद्धं वर्तते। यादृशमर्थगौरवमस्य भवति न तादृशं केषाञ्चित् कवीनामिति। अत एव भारवेरर्थगौरवमिति सङ्गच्छते कथनम्। भारविः निजकाव्यवर्णचातुर्यं किरातार्जुनीये साधु प्रकटितवान्। काव्यादर्शविषये कवेरुक्तिः सत्यं प्रतिभाति। यथा—

"स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम्।
रचिता पृथगर्थता गिरां न च सामर्थ्यमपोहितं क्वचित्॥"

भारविः काव्यशैल्याः प्रदर्शनेऽद्वितीयः प्रतिभाति। नीतिसम्बन्धिसूक्तिप्रदर्शने, आलङ्कारिकाणां शब्दानां प्रयोगे च भारविः सिद्धहस्त आसीत्।

"हितं मनोहारि च दुर्लभं वचः" "वरं विरोधोऽपि समं महात्मभिः" इत्यादिसूक्तयः साहित्यजगति कवेः यशः तन्वन्ति। भारवेः काव्यकलां दृष्ट्वा श्रीमल्लिनाथसूरि एवं समलिखत—

"नारिकेलफलसम्मितं वचो भारवेः सपदि यत् विभज्यते।
स्वादयन्तु रसगर्भनिर्भरं सारमस्य रसिका यथेप्सितम्॥"

नारिकेलरसमिव भारवेः कवितासु विविधरूपाः अर्थगम्भीरताः लक्ष्यन्ते। चित्रबन्धेषु तस्य काव्यकलोत्कृष्टता साधुतया समासादिता। परन्तु विशेषतः भारवेः कवितासु नीतिशास्त्रस्य प्रतिपादनं व्यावहारिकं वातावरणं, धर्मः, सदाचारश्चेत्यादयः विषया अधिकतया प्राप्यन्ते। पदवाक्यशब्दानामेतादृशं गाम्भीर्य-

मैक्यञ्च विद्यते यत् सम्यग् ज्ञानाय काव्यनैपुण्यमादावावश्यकमस्ति। काव्यस्य पञ्चदशसर्गः कवेः कवित्वशक्तेः परिचायकोऽस्ति। भारविः यदि राजनीतिशास्त्रस्य वेत्तासीत्तदा प्राप्तप्रतिभः कविरप्यासीत्। राजनीतिशास्त्रस्य सिद्धान्तप्रतिपादनेऽपि भारवेः कवित्वशक्तिर्लक्ष्यते। अत एवास्य कविता सरसेति। प्रकृतिवर्णनेऽपि सिद्धहस्तः। दर्शनशास्त्रस्य गम्भीरतामारभ्य राज्ञः सेनापतेः कृषकस्य च चित्रचित्रणेऽतिनिपुणो भारविः।

वयान्तं वर्णयामः भारवेः कवितामु तस्य काव्यकलां दृष्ट्वा सर्वेऽपि तस्य महत्त्वं स्वीकुर्वन्ति।

(२७) प्रश्नः—युक्तियुक्तं समर्थ्यतां—"भारवेरर्थगौरवम्।"

उत्तरम्—भारवेः प्रधानतमं काव्यमेकमात्रमेव "किरातार्जुनीयम्" कवेः कीर्तिं काव्यजगति विस्तारयति। संस्कृतसाहित्ये भारविः आलङ्कारिककाव्यानां प्रवर्तको जातः। काव्यशैल्यां राजनीतिसिद्धान्तं यथा किरातार्जुनीये प्रतिपादितमस्ति न तथा संस्कृतस्य कस्यचित् कवेः काव्ये दृश्यते। महाकविभारवेः मनो न माघ इव शब्दार्थगौरवे रमते, न च हर्ष इव प्रौढोक्त्यां, पदलालित्ये परिरम्भक्रीडायां वा रमते। किरातार्जुनीये यत्र तत्रैषां सिद्धान्तानां समावेशो दृश्यते तथापि न प्रधानरूपेण।

एतदेव कारणमस्ति यत् प्राचीनालोचकैः "भारवेरर्थगौरवम्" इत्याभाणकेन स्वाभिमतं प्रकटितम्। भारविः शब्दचमत्कारप्रदर्शने तादृशीं निजप्रतिभां न प्रयुनक्ति यादृशीं प्रतिभां शब्दचमत्कारप्रदर्शने हर्षमाघौ प्रयुङ्क्तः। न वाऽयं कविः हर्षमाघाविव श्लेषप्रियो दृश्यते। भारविः निजकाव्यकलाविषयकसिद्धान्तं स्वयमेव काव्ये एवं प्रदर्शयति—

"स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम्।
रचिता पृथगर्थता गिरां, न च सामर्थ्यमपोहितं क्वचित्॥"

अस्मिन् निकषे भारविः विशुद्धसुवर्ण-स्वर्णमिव साहित्यक्षेत्रे चकास्ति। प्रचलितेयमुक्तिः "भारवेरर्थगौरवम्" भारवेः काव्ये स्वतःसिद्धा भवति। अतिप्रख्यातमस्यार्थगौरवम्। अन्ये कवयः यं भावं चतुर्भिः श्लोकैः प्रकटितवन्तः तं भावं भारविरेकेनैव पद्येन प्राकाशत। तथा हि—

"सत्यानृता च परुषा प्रियवादिनी च, हिंस्रा दयालुरपि चार्थपरा वदान्या।
नित्यव्यया प्रचुररत्नधनागमा च वाराङ्गनेव नृप-नीतिरनेकरूपा॥"

भारविः शब्दचित्रस्याङ्कनेऽतिनिपुण आसीत्। यस्य वस्तुनः वर्णनं करोति

तस्य चित्रं सम्मुखे समुपस्थापयति । भारवेः काव्ये रीतिः न गौडी, न च सा कालिदासस्य वैदर्भीव वैदर्भी । अतो वयं कथयितुं शक्नुमः यत् कालिदास-माघयोर्मध्ये या काव्यशैली प्रवर्तमाना जाता सैव शैली भारविणा गृहीता । सौन्दर्यचमत्कृता चास्य भाषा परिष्कृता परिमार्जिता च दृश्यते । भारवेः कवितायां सूक्तीनामपि प्रयोगः साधुतया जातः । 'हितं मनोहारि च दुर्लभं वचः', 'विचित्ररूपाः खलु चित्तवृत्तयः' इत्यादिसूक्तयः पाठकानां मुखाग्रे सदैव तिष्ठन्ति । एवं समालोचन-लोचनाभ्यां दर्शने प्रतीयते यत् "भारवेरर्थगौरवम्" इति प्राचीनोक्तिः सर्वथा सत्यैवेति ।

(२८) प्रश्नः—समासतः श्रीहर्षस्य जीवनचरितं स्थितिकालञ्च प्रतिपाद्य तस्य ग्रन्थपरिचयो दीयताम् ।

उत्तरम्—श्रीहर्षस्य पिता श्रीहीरः माता च मामल्लदेवीति स्वयमेव कविः नैषधीयचरितस्य प्रतिसर्गान्ते परिचाययति । हर्षस्य पिता श्रीहीरः काशिराजस्य विजयचन्द्रस्य सभायां प्रधानभूतः पण्डित आसीत् । एकदा मिथिला-देशस्य प्रसिद्धनैयायिकेन श्रीमतोदयनाचार्येण सह तस्य शास्त्रार्थोऽभवत्, श्रूयते च शास्त्रार्थे श्रीहीरः पराजितो बभूव । पराजयक्लेशखिन्नो हीरः निजमृत्युसमये श्रीहर्षमकथयत्—पुत्र ! यदि सुपुत्रोऽसि चेत् उदयनोऽवश्यमेव पराजेयः । पितुराज्ञाकारी पुत्रः गङ्गातीरे वर्षान्तं यावत् चिन्तामणिमन्त्रं जपित्वाऽप्रतिम-पाण्डित्यस्य वरदानं प्राप्य तं पराजितवान् । श्रीहर्षः कान्यकुब्जेश्वरस्य जय-चन्द्रस्य सभायां प्रधानभूतः पण्डित आसीत् । यतो हि स्वयमेव कविना लिखितम्—

"ताम्बूलद्वयमासनञ्च लभते यः कान्यकुब्जेश्वरात् ।
यः साक्षात्कुरुते समाधिषु परं ब्रह्मप्रमोदार्णवम् ॥"

श्रीहर्षस्य सम्प्रति एते ग्रन्थाः प्राप्यन्ते । (१) स्थैर्यविचारप्रकरणम्, (२) विजयप्रशस्तिः, (३) खण्डनखण्डखाद्यम्, (४) गौडोर्वीशप्रशस्तिः, (५) अर्णववर्णनम्, (६) छन्द-प्रशस्तिः, (७) शिवशक्तिसिद्धिः, (८) नवसाहसाङ्कचरितचम्पूः, (९) नैषधीयचरितम् ।

श्रीहर्षः न केवलं कविः अपितु प्रकाण्ड-दार्शनिकोऽप्यासीत् । दार्शनिक-कवित्वयोः सम्मिश्रणेनास्य कविता सर्वथाऽनुपमेया जाता । कवितल्लजोऽयं यथा स्वभाव-मधुर-रस परिपूर्णेन पद्येन निजकवित्वं प्रदर्शयति, तथैव कर्कशशब्दा-डम्बरेण नैयायिकानपि आश्चर्यचकितान् करोति । येन कविना काव्यकलायां

वैशिष्ट्यतरं शृङ्गाररस-प्रधानं नैषधीयचरितं महाकाव्यं रचितम्, तेन कविना कथं प्रखरपाण्डित्यप्रदर्शकं खण्डनखण्डखाद्यनामको न्यायग्रन्थो विरचित इति महदाश्चर्यम् ।

अनेनैव वैशिष्ट्येन काश्मीरप्रदेशे श्रीहर्षस्य विमलकीर्तिध्वजाः दोधूयन्ते स्म । निजपाण्डित्यविषये स्वयमेव श्रीहर्षः लिखितवान्—

"यत्काव्यं मधुवर्षि धर्षितपरास्तर्केषु यस्योक्तयः ।
श्रीश्रीहर्षकवेः कृतिः कृतिमुदे तस्याभ्युदीयादियम् ॥"

(२९) प्रश्नः—"उदिते नैषधे काव्ये क्व माघः क्व च भारविः" इत्युक्तिमनुसृत्य नैषधीयचरितस्य वैशिष्ट्यमुद्घाट्यताम् ॥"

उत्तरम्—संस्कृतसाहित्ये श्रीहर्षस्य नैषधीयचरितम्" मनोहरातिमनोहरतमं काव्यं विद्यते । काव्यमिदं सुन्दरविन्यासेन समुचितार्थसन्निवेशेन हरति हृदयम् । श्रीहर्षेण निजकाव्यं 'शृङ्गारामृतशीतगुः' इति कथितम् । वस्तुतः श्रीहर्षः शृङ्गारवर्णने सिद्धहस्तस्तथाद्वितीयश्चासीत् विप्रलम्भशृङ्गारवर्णनमधीत्य यदि हृदि आनन्दो जायते, तर्हि सम्भोगशृङ्गारवर्णनमधीत्य विकसति हृदयारविन्दम् । विविधभूषणभूषिता नववधूरिव श्रीहर्षस्य कविताकामिनी शब्दार्थालङ्कारालङ्कृतास्ति । श्लेषालङ्कारवर्णने कवेः प्रवीणता जगत्प्रसिद्धा । त्रयोदशसर्गे श्लेषेण पञ्चनलीनां वर्णनं कृत्वा श्लेषालङ्कारविषये सर्वानतिशेते । किं वक्तव्यमस्यातिशयोक्तिविषये । उत्प्रेक्षालङ्कारोऽपि कवेः प्रशंसनीयः । यथा—

"हृतसारमिवेन्दुमण्डलं दमयन्तीवदनाय वेधसा ।
कृतमध्यबिलं विलोक्यते धृतगम्भीरखनी खनीलताम् ॥"

इन्दौ दृश्यमानकलङ्कं श्रीहर्षः नलवर्णने कथं प्रस्तौति । दृश्यताम्—

"यदस्य यात्रासु बलोद्धतं रजः स्फुरत्प्रतापानलधूममञ्जिमा ।
तदेव गत्वा पतितं सुधाम्बुधौ दधाति पङ्कीभवदङ्कतां विधौ ॥"

सत्यं कवेः विचित्रा सृष्टिः, सर्वसाधारणमपि विषयमादाय यदा कविः काव्यमयीं भाषां प्रयोजयति, प्रस्तौति च कल्पनामयं रचितं भावगर्भितं पद्यं, तदा कथनीया भवति तस्य शोभा । श्रीहर्षः नीरसं पाणिनेः सूत्रमपि कियत्सुन्दरं सरसमुक्तिवैचित्र्येण प्रस्तौति, भूयो भूयोऽभ्यस्यमानानां वैयाकरणानां कृते श्रीहर्षस्यायमुद्घोषः ।

"उभयी प्रकृतिः कामे सज्जेदिति मुनेर्मतः ।
अपवर्गे तृतीयेऽति भणतः पाणिनेरपि ॥"

भाषायां श्रीहर्षस्येयत्प्रभुत्वं दृश्यते यत् शब्दानामन्योऽन्यसम्बन्धः स्वयमेव सम्मिलितो भवति। शब्दवाक्ययोः प्रयोगे कवेः एतावद् दक्षत्वं विद्यते यत् एकस्यापि शब्दस्य परिवर्तनेन कविताकामिन्याः स्वरूपविकृतं भविष्यति इति आशङ्कते मनः। हर्षे यादृशो मनोहरशब्दार्थानां सन्निवेशो नान्येषु संस्कृतकविषु दृश्यते। नैषधीयचरितस्यैवं वैशिष्ट्यं विलोक्य सत्यं भारविमाघयोः कविता निष्प्रभा तुच्छा च जायते। किरातार्जुनीयशिशुपालवधौ चाधः गतौ। अतः काव्यमर्मज्ञैः यदुक्तं—"उदिते नैषधे काव्ये क्व माघः क्व च भारविः" इति सत्यं प्रतिभाति।

(३०) प्रश्नः—"नैषधं विद्वदौषधम्" उक्तिरियं समर्थ्यताम्।

उत्तरम्—को न जानाति श्रीहर्ष-प्रणीत-नैषधीयचरितस्य वैशिष्टयम्। संस्कृतसाहित्ये बृहत्त्रयी-महाकाव्यस्यातिमहत्त्वं, सर्वत्रैव चर्चा च भवति। अस्यां बृहत्त्रय्यां नैषधस्योत्तमं स्थानं विद्यते। महाकविमाघकृतः शिशुपालवधः, श्रीभारविकृतं किरातार्जुनीयं, श्रीहर्षकृतं नैषधीयचरितञ्चेत्येतेषां समाहार एव बृहत्त्रयीत्यभिधीयते। नैषधीयचरिते या काव्यविशिष्टता दृश्यते न सा कुत्रापि काव्ये वरीवृत्यते। नैषधीयचरितस्य क्लिष्टतामधिकृत्यैव केचित् समालोचकाः प्रशंसकाश्च "नैषधं विद्वदौषधम्" इत्युक्तवन्तः। अस्यायमाशयः यत् नैषधे एव विदुषां परीक्षा भवति। नैषधस्य क्लिष्टताविषये स्वयमेव श्रीहर्षेण निजप्रशस्तिग्रन्थे एवमुक्तम्—

"ग्रन्थ-ग्रन्थिरिह क्वचित्क्वचिदपि न्यासि प्रयत्नान्मया।
प्राज्ञंमन्यमना हठेन पठता माऽस्मिन् खलः खेलतु॥"

श्रीहर्षस्यानयोक्त्या क्लिष्टता एवं विद्वज्जनवेद्यत्वं च द्योत्यते। ग्रन्थावलोकनेन सत्यं च प्रतीयते। यथा नैषधीयचरिते श्रीहर्षस्य पञ्चनलीप्रयोगः, न सर्वसाधारणजनवेद्यः। अस्य काव्यस्य रसास्वादं कर्तुं विद्वांसः एव पारयन्ति नान्ये। पञ्चनली प्रयोगो यथा—

"चेतो नलं कामयते मदीयं, चेतो नलं कामयते मदीयम्।
चेतो नलं कामयते मदीयं, चेतो नलं कामयते मदीयम्॥"

अस्मिन् पद्ये यादृशी अनेकार्थता दृश्यते न तादृशी कुत्रापि दृग्गोचरीभवति।

"नलिनं मलिनं विवृण्वती दृशती स्पृशती तदीक्षणे।
अपि खञ्जन रञ्जनाञ्चिते विदधाते रुचिगर्वं दुर्विधाम्॥"

श्लोकेऽस्मिन् पदलालित्यप्रयुक्तोऽनुप्रासः, नास्ति सर्वसाधारणजनवेद्यः।

श्रीहर्षस्य पञ्चशरविषये विचारं पश्यतु—'पञ्चशरशब्दे पञ्चशब्दो न संख्यावाची, अपि तु प्रपञ्चस्य विस्तारबोधकः', यथा—

"पञ्चास्यवत् पञ्चशरस्य नाम्नि प्रपञ्चवाची खलु पञ्चशब्दः।" क्वान्तं वर्णयामः ? श्रीहर्षस्य प्रतिभा बहुमुखी आसीत्। काव्ये दार्शनिकभावः, व्याकरणस्य गूढतमज्ञानं, शब्दार्थालङ्कारप्रयोगः, वैदिकज्ञानञ्च, सर्वमेतत् श्रीहर्षस्य वैशिष्ट्यपरिचायकरूपेण नैषधे प्राप्यते।

अतः विद्वज्जनवेद्यमिदं काव्यमिति निष्प्रपञ्चम्। नैषधीयचरितस्यैवं वैशिष्ट्यं विलोक्य केषाञ्चित् विदुषां कथनं "नैषधं विद्वदौषधम्" नामङ्गतं प्रतिभातीति दिक्।

(३१) प्रश्नः—सुबन्धोः स्थितिकालं, काव्यशैलीं च प्रतिपाद्य, गद्यसाहित्ये तस्य स्थानं निर्धार्यताम्।

उत्तरम्—अलङ्कृतशैल्यां गद्यकाव्यस्य प्रथमो लेखकः सुबन्धुरेव। अस्यैव काव्यम् अलङ्कृतशैल्याः उत्कृष्टोदाहरणं भवति। परन्त्वतिखेदस्य विषयः यदस्य महाकवेः स्थानं तस्य स्थितिकालविषये च विदुषां मतैक्यं नास्ति। बाणभट्टेनास्य भूरि भूरि प्रशंसा कृता, अतः बाणात्पूर्ववर्ती सुबन्धुरिति प्रतीयते। स्वयं सुबन्धुना "न्यायस्थितिमिवोद्योतकारस्वरूपम्" इति लिखित्वा उद्योतकारस्य सङ्केतः कृतः। अतः उद्योतकारात् पश्चादेव अस्य स्थितिरिति प्रतिभाति। श्रीसुबन्धुः स्वकीयग्रन्थे विक्रमादित्यस्य कीर्तिमेवं वर्णयति—

"सारसवत्ता विहिता नवला विलसन्ति चरति न कङ्कः।
सरसीव कीर्तिशेषं गतवति भुवि विक्रमादित्ये॥"

विक्रमादित्यस्य समयः षष्ठशताब्द्याः मध्यो भागः विद्यते। एभिः सर्वैः प्रमाणैः सुबन्धोः स्थितिकालः षष्ठशताब्द्याः अन्तिमो भागः निश्चीयते। संस्कृतसाहित्यस्य गद्यसाहित्ये सुबन्धोरेकमेव वासवदत्तानामकाव्यं साहित्यगगनेऽस्य कीर्तिध्वजां धुनोति। अस्य कथा यद्यपि प्राचीनतमास्ति, तथापि सुबन्धुः निजप्रतिभया कल्पनाशक्त्या वा कथासु प्राणं दत्वा स्वीयं वैशिष्ट्यं प्रस्तौति। वासवदत्तायाः गद्यशैली एवं दृश्यते यत्र कथा स्वल्पा, किन्तु वर्णनमाडम्बरपूर्णं लम्बायमानञ्च विद्यते। कविः निजकौशलेन विविधालङ्कारैः कथानकं समलङ्कृत्य अतिचमत्कारं प्रदर्शयति। येषामलङ्काराणां श्रीसुबन्धुः प्रयोगमकरोत्, तेषु श्लेषस्य विशेषचमत्कारः दरीदृश्यते। स्वयमेव सुबन्धुः निजप्रबन्धं श्लेषमयप्रपञ्चविन्यासमुक्तवान्। श्लेषस्य चमत्कारप्रदर्शनाय कृतप्रतिज्ञो भूत्वा कविः काव्यं रचितवान्। श्लेष-

प्रतिभां विलोक्य सर्वैरेवं स्वीक्रियते। विशेषतः सुबन्धुः श्लेषकविः आसीदिति नात्र संशयः। श्लेषस्य चमत्कारं प्रदर्शयन् कविः कुत्रचित् स्थाने कठिनात् कठिनतमं गद्यश्लेषं प्रस्तौति। तत्र खलु कोषज्ञानं विनार्थज्ञानं सुदुर्लभम्। तथाहि— "नन्दगोप इव यशोदयान्वितः, जरासन्ध इव घटित-सन्धि-विग्रहः, भार्गव इव सदानभोगः, दशरथ इव सुमित्रोपेतः, सुमन्त्रणाधिष्ठितश्च, दिलीप इव सुदक्षिणान्वितः, रक्षितगुरुश्च' इत्यादौ श्लेषस्य काठिन्यमवर्णनीयं दृश्यते।

सुबन्धोः काव्ये कलापक्षस्यैव साम्राज्यं विद्यते। अस्य वासवदत्ता नामकाव्यं सुसज्जित-महत्प्रासादमिव प्रतिभाति यस्य प्रतिपक्षं विविधालङ्कारैरलङ्कृतं चित्रमिव दृश्यते। श्रीबाणेनास्य विषये यदुक्तं तत् श्लाघ्यमेव—

"कवीनामगलद्गर्वो नूनं वासवदत्तया।
शक्त्येव पाण्डुपुत्राणां गदया कर्णगोचरम्॥"

(३२) प्रश्नः—सुबन्धुबाणयोः तुलनां विधाय अनयोः भवतां कतरः प्रियतरः कविरिति प्रतिपाद्यताम्।

उत्तरम्—द्वावेव गद्यकाव्यस्योत्कृष्टकर्तारौ आस्ताम्। सुबन्धुः सर्वप्रथममलङ्कृतायां भाषायां गद्यं निर्माय संस्कृतसाहित्योद्यानस्य शोभां सम्वर्द्धयामास। लघीयसीं कथामादाय वर्णनस्य यादृशं वैचित्र्यं सुबन्धुः प्रस्तुतवान् न तादृशं वैचित्र्यं कुत्राप्यन्यत्र दृश्यते। विशेषतः श्लेषालङ्कारस्य तु सुबन्धुराचार्य एव। बाणेनापि सुबन्धोः प्रशंसा मुक्तकण्ठेन कृता।

महाकविः बाणस्तु संस्कृतगद्यस्य सम्राडेवासीत्। तुलनावसरे नान्यः कविः अस्य समकक्षतामधिगच्छति। बाणस्य वर्णनशैली अगाधजलनिधिरिव प्रतीयते। यत्र विविधतरङ्गानिव कुत्रापि परिसंख्यालङ्कारस्य मनोहरत्वं, कुत्रचित्स्थाने च पौराणिककथायाः वैचित्र्यं दरीदृश्यते। नास्ति संसारे किमपि वस्तु यन्न वर्णितं बाणेन। अत एवोच्यते—"बाणोच्छिष्टं जगत्सर्वम्"। सुबन्धुबाणयोः तुलनायां महानन्तरो दृश्यते। सुबन्धोः गद्यं अक्षराडम्बरस्य साक्षात् चित्रं विद्यते। बाणस्य गद्यं तु स्निग्धं रसपेशलं पाञ्चालीरीतेर्भव्याकृतिरिव प्रतिभाति। सुबन्धुः चक्षुषी निमील्य प्रकरणमविचारयन् श्लेषस्य चित्रं व्यूह इव प्रस्तौति। परन्तु बाणस्य दृष्टिः कदापि वर्ण्यविषयमवसरञ्च न दूरीकरोति। बाणः यत् किमपि लिखति तत्रावसरप्रकरणयोः युद्धं न भवति, अत एवास्य गद्यं स्निग्धं रसपेशलं हृदयहारकमेतादृशमस्ति यत् पठित्वैव स्पन्दते हृदयं, प्रवहति मानसे रसप्रवाहः। इतः सुबन्धोः गद्यं वृथाऽडम्बरयुक्तं प्रथमं तु मस्तिष्केण सह सङ्घट्टितं भवति, अति-

काठिन्येन मानसे प्रविशति च, मानसे गत्वापि शब्दाडम्बरं सदैव खटखटायते। रस-माधुर्य-जवो न प्रवहति न वा कदापि चित्ते रसानुभूतेः त्रिवेणी निःसरति।

गद्य-साहित्ये सुबन्धोरेकमेव वासवदत्तानामकाव्यं विद्यते। बाणस्य हर्षचरितं, कादम्बरी इति द्वे गद्यमहाकाव्ये विद्येते। अतः रचनापेक्षयापि बाणः महानस्ति। बाणस्य कादम्बर्याः समक्षे वासवदत्तायाः न्यूनातिन्यूनं मूल्यं वर्तते। एवं द्वयोः मूल्याङ्कनेन बाण एव महान् प्रियतरः कविरस्ति इति नात्र संशयः।

(३३) प्रश्नः—"गद्यं कवीनां निकषं वदन्ति" इति युक्तियुक्तं समर्थ्यताम्।

उत्तरम्—सर्वासां भाषाणां जननी संस्कृतभाषेति कथ्यते। संस्कृतभाषा विश्वस्य सर्वाभ्यः भाषाभ्यः महनीयतरेति। संसारे सर्वप्रथमं कवितायाः, काव्यस्य, महाकाव्यस्य, नाटककथाख्यायिकानां चाविर्भावोऽस्यामेव भाषायां जातः। वैदिकसाहित्ये गद्यमवतीर्य जगति निजविकासं व्यकासयत्, संसारे साम्राज्यमपि प्राप। विशेषतः साम्प्रतमस्यैव साम्राज्यं सर्वासु भाषासु दृश्यते। अधुना भारतीयजनभाषासु गद्यस्यैव प्रभुत्वं दृश्यते। गद्ये हि कथाख्यायिकोपन्यासादिग्रन्थाः निर्मीयन्ते। अतः गद्यस्यायं युग इति कथ्यते। संस्कृत-साहित्ये गद्यस्यातिमहत्त्वं विद्यते। नाविदितं केषाञ्चित् विदुषां यद् महामान्याः स्वनामधन्याः सुबन्धुबाणदण्डिनो महाकवयः संस्कृते समभूवन्। सुधाधिकमधुराणि गद्यकाव्यानि च निर्मितवन्तः।

गद्यस्येमां प्रशस्तिमवलोक्य केषाञ्चित्समालोचकानां कथनमिदं यत्—"गद्यं कवीनां निकषं वदन्ति" नितान्तं सत्यं प्रतिभाति। कास्ति गद्ये एतादृशी विशेषता यया पद्यापेक्षया गद्यं वैशिष्ट्यं भजते निकषं च मन्यते? इत्यपेक्षायां सूक्ष्मदृष्टिभिः विवेचनमावश्यकम्। युगोऽयं वैज्ञानिकः। सर्वे द्रुतगतिं सरलोपायञ्चापेक्षन्ते। पद्ये वृत्तनिगडबद्धो भवति कविः। गुणरीत्योः कठोरशासनं भवति तत्र। अतः पराधीनो भवति कविः छन्दोनियन्त्रितैः नियमिताक्षरैः विशदविचारप्रकटनमतिकठिनं विद्यते। अतोऽत्र कविः यमाशयं शतपङ्क्तिभिः प्रकटयितुं शक्नोति, तमेव पद्येऽनेकाभिः पङ्क्तिभिः प्रकटयति, अतः स्वाभाविकं तत्र काठिन्यम्। छन्दोऽलङ्कारगुणरीतिभावैर्भरितं पद्यं पठित्वा सर्वसाधारणो जनः तत्र काव्यार्थावगमे सर्वथाऽसमर्थः। परमत्र गद्ये नास्ति तादृशं किमपि बन्धनम्। स्वतन्त्रो भवति लेखकः। छन्दोनियमिताक्षरमात्रयोः परिगणनं नास्त्यावश्यकम्। **विशदीकृत्यविषयः प्रस्तूयते गद्ये।** सर्वसाधारणो जनः अनायासेनास्वादयति **काव्य-**

रसम् । एतत् सौलभ्यत्वात् गद्ये चमत्कारपूर्णं सौन्दर्ययुक्तं कमनीयविचारञ्च प्रकटयितुं शक्नोति कविः ।

काव्यस्य द्वौ भेदौ दृश्यं श्रव्यञ्च, तत्र खलु नाटके गद्यस्य प्रयोगात् सर्वजनाह्लादकत्वाच्चैव काव्येषु नाटकं रम्यमित्युच्यते । गद्यकाव्यस्यानन्दो विचित्रो भवति । कादम्बरीमधीत्य गद्यकाव्यस्यानन्दसागरे निमज्य अलङ्कारचषकैः सुरारसमिव काव्यरसं पीत्वा मदमत्तो भवति काव्यरसिकः । सत्यमुक्तम्—

"कादम्बरीरसभरेण समस्त एव, मत्तो न किञ्चिदपि चेतयते जनोऽयम् ।"

क्वान्तं वर्णयामः गद्यस्य वैशिष्ट्यम् । गद्यस्यैवं वैशिष्ट्यं विलोक्य यदुक्तं केनचित् काव्यमर्मज्ञेन—"गद्यं कवीनां निकषं वदन्ति" इति सत्यमेवेति दिक् ।

(३४) प्रश्नः—बाणस्य परिचयं स्थितिकालञ्च प्रतिपाद्य गद्यसाहित्ये बाणभट्टस्य स्थानं निर्धार्यताम् ।

उत्तरम्—बाणस्य पूर्वजा शोणनद्यास्तटस्थिते 'प्रीतिकूट' नाम्नि नगरे निवसन्ति स्म । स्थानमिदं विहारराज्यस्थित 'आरा' मण्डलान्तर्गतं साम्प्रतं प्राप्यते । प्राचीनकालादेव बाणस्य वंशः विद्याधर्मयोः क्षेत्रे ख्यातिगत आसीत् । वात्सायने गोत्रे बाणस्य जन्म जातम् । बाणस्यैकः पूर्वजः कुबेर नामासीत् । यस्य चत्वारः पुत्राः आसन् । एषु चतुर्षु कनिष्ठः पुत्रः अर्थपतिः यस्य पुत्रः चित्रभानुर्नामाभवत् । स एव चित्रभानुः बाणस्य पिताऽऽसीत् । बाणस्य पार्श्वे पर्याप्त-पैत्रिकसम्पत्तिरासीत् । तथापि सुयोग्याभिभावकाभावात् कुसङ्गतिवशाच्च बाणः आखेट-व्यसनी जातः देशाटनव्यसनी बाणः सहयोगिभिः सह यथेच्छं देशाटनं कृतवान् । देशाटनेनैव बाणः निजबुद्धिविकासं, सांसारिकानुभवं, तथोदारस्वभावञ्चार्जितवान् । एकदा श्रीहर्षस्य भ्रातृव्यः समागत्य तत्पत्रं ददौ । पत्रं प्राप्य बाणः हर्षस्य सभायां समुपस्थितवान् । प्रथमं श्रीहर्षेण बाणोऽनादृतः परन्तु पश्चात् तस्य प्रतिभया प्रसन्नो भूत्वा तस्मै आश्रयं ददौ । ततः श्रीबाणः चिरकालं यावत् तस्य सभां समलङ्कृतवान् । श्रीहर्षस्य चरित्र-शुश्रूषणामाग्रहेण हर्षचरितमरीरचत् । हर्षचरितमस्य प्राथमिकी रचनेति कथ्यते । तदनन्तरं बाणेन 'चण्डीशतकं', 'कादम्बरी' महाकाव्यं च रचितम् । इदमपि कथ्यते यत् बाणः कादम्बर्याः पूर्वार्द्धभागमेव विरचय्य स्वर्गं गतः । तत्पश्चात् तत्तनयपुलिन्दभट्टेन अस्यारुत्तरभागस्य रचना कृता ।

स्थितिकालः—बाणः श्रीहर्षस्य सभापण्डित आसीत् । अतः बाणस्य स्थितिकालः ईसायाः सप्तमशताब्द्यां मन्यते । श्रीवामनाचार्यः स्वीये काव्यालङ्कारसूत्रे

कादम्बर्याः गद्यं समुद्धृतवान्। अस्य समयः ७७१ ईस्व्यां आरभ्य ८१३ ईस्वी-पर्यन्तं स्वीक्रियते, अनेन प्रमाणेनापि बाणस्य समयः ईसायाः सप्तमशताब्द्यामेव स्थिरीभवति।

गद्यसाहित्ये बाणस्य स्थानम्—सर्वेषु गद्यकविषु बाणस्य स्थानमुन्नतं विद्यते। बाणस्तु संस्कृत-गद्य-साहित्यस्य सम्राडेवासीत्। अथवा गद्यस्य बाणः आचार्य एवेति कथने नात्युक्तिः। यतो हि 'गद्यं कवीनां निकषं वदन्ति' इति नीत्या बाणस्य गद्यं गद्यसाहित्यस्यादर्शमेवेति। साम्प्रतमपि गद्यकाव्येषु कादम्बरी, आदर्शभूता अतिवैशिष्ट्यं भजते। अनेके कवयः एनामनुकृत्य काव्यमरीरचन्। "उदयसुन्दरीकथा" "तिलकमञ्जरी" इत्यादीनि गद्यकाव्यानि एनामनुकृत्यैव निर्मितानि सन्ति। श्रीबाणभट्टस्य वैशिष्ट्यं विलोक्यैव अनेके विद्वांसः अस्य विषये विविधं सारगर्भितं पद्यं चक्रिरे। तथा हि—

"जाता शिखण्डिनी प्राक् यथा शिखण्डी तथावगच्छामि।
प्रागल्भ्यमधिकमाप्तुं वाणी बाणो बभूवेति॥"

इति गोवर्धनाचार्यस्येयं सूक्तिः बाणस्य वैशिष्ट्यमेव तनोति।

(३५) प्रश्नः—समालोच्यतां 'वाणी बाणो बभूवेति'।

उत्तरम्—गद्यसाहित्ये बाणस्य महत्त्वपूर्णं स्थानमस्ति। बाणस्य गद्यस्योपमा निखिले संस्कृतसाहित्ये सयत्नान्वेषणेनापि न प्राप्यते। प्रभावशालिगद्य-निर्माणे बाणः सिद्धहस्तः अद्वितीयश्चाऽसीत्। बाणः सरस्वत्याः वरदपुत्रः। गद्यसाहित्येऽस्य गद्यमादर्शस्वरूपमद्वितीयञ्च मन्यते। प्राचीनकालादेव समालोचकानां दृष्टिः बाणस्य सरसमधुरासु रचनासु पपात। श्रीगोवर्धनाचार्यस्तु महाकविबाणं वाग्देवतायाः अवतारं स्वीचकार—

"जाता शिखण्डिनी प्राक् यथा शिखण्डी तथावगच्छामि।
प्रागल्भ्यमधिकमाप्तुं वाणी बाणो बभूवेति॥"

बाणस्य शैली गद्यलेखने एतादृशी परिमार्जिताऽस्ति यत् यस्य वर्णनं करोति कविः तस्य चित्रं पाठकानां नयन-पटले चित्रमिवाङ्कयति। यद्यपि वर्णनेषु सजीवताऽऽनयनाय प्रभावोत्पादनाय च समासबहुलाम् ओजोगुणमण्डितां च शैलीमाश्रयति तथापि बाणः कस्याश्चित् शैल्याः क्रीतदासो न लक्ष्यते। विषयानुसारं शैलीं परिवर्त्य निजप्रतिभां प्रदर्शयति। यथा सन्ध्योपवन-काननानां वर्णने दीर्घसमासस्य छटाऽतिरमणीयतां भजते। तथैव विरहवर्णने लघु-लघुशब्दानां प्रसादगुणगुम्फितानां पदविन्यासः दर्शनीयतां याति। दृश्यतामेकमुदाहरणम्—

"सखे पुण्डरीक ! नैतदनुरूपं भवतः । क्षुद्र जन क्षुण्ण एष मार्गः । धैर्यधना हि साधवः । किं यः कश्चित् प्रकृत इव विफलीभवन्तमात्मानं न रुणत्सि, क्व ते तद् धैर्यम्, क्वासौ इन्द्रियजयः" इत्यादि । अत्रासमस्तपदानां लघुवाक्यानां च प्रयोगेण गद्यस्य मनोहरत्वमतिदर्शनीयं विद्यते । शूद्रकस्य, महाश्वेतायाः, जाबालेः आश्रमस्य च विन्ध्याटव्याश्च वर्णने बाणः दीर्घसमासस्याश्रयम् आदाय तद् विषयस्य चित्रं चित्रयति । वस्तुतो बाणः संस्कृतभाषायाः सम्राडेवास्ति । शब्देषु बाणस्याद्भुतं प्रभुत्वं तथा गद्ये चाद्भुतः प्रवाहः दरीदृश्यते । बाणस्यैतद् वैशिष्ट्यं विलोक्य प्राचीनकालादेव समालोचकाः अस्य कवितां प्रशंसयामासुः । श्रीगोवर्धनाचार्यः वाग्देव्याः अवतारं मन्यते । अन्ये केचन समालोचकाः 'गम्भीर-धीरकविताटवीषु विहरतां कविता-कुञ्जराणां गण्डस्थलविदारको बाणः' इत्यूचिरे—

"आः सर्वत्र सुधागभीरकविता विन्ध्याटवी चातुरी ।
सञ्चारी-कवि-कुम्भि-कुम्भभिदुरो बाणस्तु पञ्चाननः ॥"

श्रीधर्मदासेन बाणस्य प्रशंसा एवं कृता, यथा हि—

"रुचिर-स्वर-वर्णपदा रसभाववती, जगन्मनो हरति ।
सा किं तरुणी नहि नहि वाणी बाणस्य मधुरशीलस्य ॥"

एवं प्रकारेण विविधाः समालोचकाः विविधाभिः दृष्टिभिः प्रशंसां चक्रुः । किमप्यस्तु बाणः वाण्याः अवतारो न भवतु परन्तु अतिलोकप्रियः प्रतिभावाञ्च कविरासीदिति स्वीकर्तव्यमेवेति ।

(३६) प्रश्नः—युक्तियुक्तं समर्थ्यताम् "बाणोच्छिष्टं जगत्सर्वम्" ।

उत्तरम्—कादम्बरी बाणस्य सर्वोत्कृष्टा रचनाऽस्ति । अस्याः कथा कौतूहलपूर्णा सन्ति । पठनसमये पाठकानां कौतूहलमुत्तरोत्तरं वर्धते एव । बाणस्य सर्वोत्कृष्टां शैलीं विलोक्यैव केचिदूचिरे 'बाणोच्छिष्टं जगत्सर्वं"मिति काभिः विशेषताभिः 'बाणोच्छिष्टं जगत्सर्वं'मित्युच्यते, इत्यस्मिन् विषये सर्वप्रथममत्र बाणस्य कवित्वशक्तिं, गद्यवैशिष्टयं वा पर्यालोचयामः । कस्यचिदपि कवेः प्रतिभासमीक्षणाय, तस्य काव्यस्य कलापक्षं, हृदयपक्षं, वर्णनशैलीं च दृष्टव्यम् ।

कलापक्षः—बाणस्य प्रकृतिवर्णनं सौम्यं रुचिरञ्चास्ति । वर्णनेषु सजीवतामानेतुं बाणः उपमोत्प्रेक्षा श्लेष-विरोधाभास परिसंख्यालङ्काराणामाश्रयं गृहीतवान् । तत्रापि परिसंख्यालङ्कारस्य तु बाणः सम्राडिति नात्र संशयः । श्लिष्ट परिसंख्यायाः ईदृशं चमत्कारपूर्णं वर्णनं न कोऽपि कविः कृतवान् । आदर्शगद्यस्य यादृशं स्वरूपं सिद्धान्तं वा बाणेन हर्षचरिते वर्णितं तादृशमेव गद्यं कादम्बर्यां प्रस्तुतम् । बाणस्य रसनोपमायाः छटा विलोक्यताम्—

"क्रमेण च कृतं मे वपुषि वसन्तेन, वसन्त इव मधुमासेन, मधुमास इव पल्लवेन, नवपल्लव इव कुसुमेन, कुसुमम् इव मधुकरणे, मधुकर इव मदेन, नवयौवनेन पदम्" इत्यादि। परिसंख्यालङ्कारस्य तु बाणः सम्राडेव प्रतिभाति। परिसंख्यालङ्कारवर्णने बाणः सर्वानतिशेते। जाबाल्याश्रमवर्णने परिसंख्यालङ्कारस्य मनोहरत्वं पश्यतु।

"यत्र च महाभारते शकुनिवधः, पुराणे वायुप्रलपितं, वय-परिणामे द्विजपतनम्, उपवनचन्दनेषु जाड्यम्, अग्नीनां भूतिमत्त्वम्, एणकानां गीतव्यसनम्, शिखण्डिनां नृत्यपक्षपातः, भुजङ्गानां भोगः, कवीनां श्रीफलाभिलाषः, मूलानामधोगतिः" एवं कादम्बर्यां नहि कतिपयमेवोदाहरणम् अपि तु सहस्राधिकमुदाहरणं भवितुं शक्नोति।

हृदयपक्षः—बाणस्य हृदयपक्षोऽपि सर्वोत्कृष्टः विद्यते। मानवीय नानाभावाभिव्यक्तौ विविधानां कोमलमनोभावनानां मार्मिकविश्लेषणे बाणोऽद्वितीयः कविरिति निश्चप्रचम्। पात्रस्य मनोदशायाः विस्तृतं सजीवं विशदञ्च वर्णनं बाणस्य प्रतिभां विस्तारयति।

बाणस्य गद्येषु रसस्याजस्रः प्रवाहः प्रवहति। महाश्वेतायाः प्रणयवर्णने कादम्बर्याः साक्षात्कारे च मनोदशायाः यादृशं चित्रणं बाणेन प्रस्तुतं तादृशं चित्रणं सयत्नान्वेषणेनापि संस्कृतसाहित्ये न दृश्यते। महाश्वेतायाः विलापः, कादम्बर्याः विरह-वर्णनं च विप्रलम्भश‍ृङ्गारस्योत्कृष्टे निदर्शने स्तः।

वस्तुतस्तु बाणस्य गद्यं पञ्चानन इव प्रतिवर्त्म सिंहगर्जनां कुर्वन् चलति। क्वचित् भयध्वनिं कुर्वती नदीव महावेगेन प्रवहति कुत्रापि च शरत्कालीना नदीव शनैः शनैः प्रवहमाना कामपि अपूर्वां शोभां कलयति।

शैली—बाणस्य शैली द्विविधा दृश्यते। वनस्य वर्णनेषु बहुधा सजीवतामानेतुं समासबहुलायाः तथौजोगुणमण्डितायाः आश्रयं गृह्णति कविः। एवंविधस्थलेषु समासगतछटा दर्शनीया भवति। विन्ध्याटव्याः वर्णने सन्ध्यायाः वर्णने च एवंविधायाः शैल्याः प्रयोगं कृत्वा सजीवं गद्यं प्रस्तौति। विरह-वर्णने वार्तालापावसरे च बाणः प्रसादगुणगुम्फितां शैलीमधिकृतवान्। एवं प्रकारेण बाणः आवश्यकतानुसारं शैलीं परिवर्त्य वर्णने प्राणास्पदं सञ्जीवनं दत्त्वा गद्यं निर्माति। श्रीराजशेखरेण पञ्चालीरीतेः निदर्शना बाणस्य शैलीति कथिता—

"शब्दार्थयोः समो गुम्फः पाञ्चाली रीतिरिष्यते।
शिलाभट्टारिका वाचि बाणोक्तिषु च सा यदि॥"

वर्ण्यविषयानुरूपशब्दः, यादृशः शब्दः तादृशश्चार्थ इति बाणस्य वैशिष्ट्यं विद्यते । यदि वर्ण्य विषयः विपिनं भवेत् तदा कवेः शैली सर्वोत्कृष्ट-पदमण्डिता, एवं हि यदि वर्ण्यविषयः कामिनीरूपलावण्यचित्रणं भवेत्, तदाऽस्य पदविन्यासो नितान्तं ललितः कमनीयश्च दृश्यते । बाणस्य पदवाक्ययोरुपरि एतावदाधिपत्यं विद्यते यत् कुत्रापि पुनरुक्तिर्न लक्ष्यते ।

कथितपदानां प्रयुक्तभावानां पुनरायोजनस्यावश्यकतैव नास्ति । शब्ददरिद्र-कविरेव शब्दस्य पुनरुक्ति विदधाति । बाणस्तु शब्दधनानां कुबेरः अत एवास्य गद्यं रुचिरं कमनीयं, स्निग्धं तथावश्यकतानुसारं कठोरं सरलं च विद्यते ।

इमे एव सन्ति बाणस्य विशिष्टाः गुणाः यैराकृष्टाः समालोचकाः आभ-णन्ति—"बाणोच्छिष्टं जगत्सर्वम्" इति दिक् ।

(३७) प्रश्नः—संस्कृतसाहित्ये गद्यस्य वैशिष्टच तद् विकास-परम्पराञ्च वर्णय ।

उत्तरम्—संस्कृतसाहित्ये गद्यस्यातिमहत्त्वं तदाधिक्यं च दृश्यते । यतो हि गद्यस्य प्रयोगः संस्कृतसाहित्ये वैदिककालादेव जातः । विशेषतः अखिलविश्वेषु सर्वप्रथममार्यजातेः वैदिकसाहित्ये एव गद्यस्याविर्भावो जातः । संसारस्य सर्वेभ्यः प्राचीनतमेषु वेदेषु गद्यस्य प्रचुरप्रयोगो दृश्यते । गद्यस्य प्राचीनतमं रूपं वेदेष्वेव प्राप्यते । वैदिकसंहितायां तथापि च कृष्णयजुर्वेदसंहितायां गद्यस्याधिकप्रयोगोऽ-भवत् । अथर्ववेदस्य षष्ठतमो भागः गद्यात्मक एव । ब्राह्मणग्रन्थानां रचना गद्ये एव जाता । आरण्यके उपनिषदि च गद्यस्य नितरां सुन्दरस्वरूपं प्राप्यते । दर्शनग्रन्थेषु सिद्धान्तविवेचनावसरे गद्यस्यैवाश्रयं गृह्यते । एवं हि वैदिककाला-दारभ्याद्यावधि गद्यस्य प्रयोगदर्शनात् गद्यस्य वैशिष्टच-स्वीकारे न केषामपि विमतिः स्यादिति निश्चप्रचम् । संस्कृतगद्यस्य प्रथमं वैशिष्ट्यमस्ति 'लाघवम्' । यो विचारः अन्यासु भाषासु दीर्घवाक्यैः प्रकटयितुं शक्यते स एव विचारः संस्कृतभाषायां कतिपयैरेव शब्दैः प्रकट्यते ।

समासेनाधिकोऽर्थः अल्पेन शब्देन प्रकटयितुं शक्यते । अतः समासः संस्कृत-भाषायाः प्राणः ।

ओजसा संस्कृतगद्यस्य सौन्दर्यं वर्धते । "ओजःसमासभूयस्त्वमेतद् गद्यस्य जीवित"मिति दण्डिनः कथनं सत्यं प्रतिभाति । गद्यस्य या शैली बाणस्य गद्ये प्राप्यते, सैव समासबहुला शैली रुद्रदामनमहाभागस्य शिलालेखेषु तथा हरिषेण-कृत प्रयागप्रशस्तौ च प्राप्यते ।

अयमाशयः यत् संस्कृतस्य गद्ये बाणात् पञ्चशतवर्षपूर्वमेव समासबहुलायाः शैल्याः विकासो जातः। वैदिकसाहित्ये गद्यस्य द्वे रूपे दृश्येते, प्रथमं सरलं व्यावहारिकं द्वितीयञ्च समासबहुलम्। द्वयोरपि गद्ययोः स्वाभाविकं सौन्दर्यं मनोमुग्धत्वं च प्राप्यते।

गद्यस्य आलङ्कारिकस्वरूपं वैदिककालादेव दृश्यते। लौकिकसाहित्ये आचार्यपतञ्जलिः, शबरस्वामी, श्रीशङ्कराचार्यः, जयन्तभट्टः, एते विद्वांसः एतादृशं गद्यं निर्मितवन्तः यमधीत्य न केनापि काठिन्यं दुरूहत्वं वा प्रतीयते। विक्रमाब्देः चतुःशतवर्षपूर्वं संस्कृतसाहित्ये गद्यात्मककथायाः आविर्भावो जातः।

कात्यायनेन आख्यानाख्यायिकयोरुल्लेखः कृतः। पतञ्जलिनापि वासवदत्तासुमनोत्तरेत्यादिग्रन्थानाम् आख्यायिकारूपेणोदाहरणं प्रस्तुतम्। अस्मिन् काले सुन्दरातिसुन्दरतमस्य गद्यकाव्यस्य निर्माणो जातः। गद्यस्य विकासो एवं हि दृश्यते। साम्प्रतं तु गद्यस्यैव युगः। सर्वासु भाषासु गद्यस्याति महत्त्वमुपयोगित्वं च दृश्यते। प्रतिदिनं शताधिकाः पत्रपत्रिकादयः विविधभारतीयभाषासु मुद्रयन्ते। वैज्ञानिकोऽयं युगः गद्यस्य कृते वरदानम्, यतो हि तत्प्रसादात् निखिलेऽस्मिन् संसारे गद्यस्य साम्राज्यं जातम्।

(३८) प्रश्नः—दण्डिनः परिचयं दत्त्वा तस्य स्थितिकालः निर्णीयताम्।

उत्तरम्—स मेधावी कविर्विद्वान् भारविं प्रभवां गिराम्।
अनुरुध्याकरोन्मैत्रीं नरेन्द्रे विष्णुवर्धने॥

अनेन पद्येन कवेः जीवन-चरितं प्रकाशितं भवति। भारवेः सहायता कवेः प्रपितामहस्य श्रीदामोदरस्य मैत्री विष्णुवर्धनेन सहाभवत्। दण्डिनः जन्म काञ्जीवरमिति नाम्नाधुना प्रसिद्धनगरे अभवत्। काञ्च्याः पल्लवनरेशस्य पुत्रस्य शिक्षार्थं दण्डी "काव्यादर्शम्" रचितवान् इति प्रसिद्धास्ति किंवदन्ती कथा।

स्थिति-कालः—नवमशताब्द्याः ग्रन्थेषु दण्डिनः नामोल्लेखः प्राप्यते। ततः दण्डिनः समयो नवमशताब्द्याः पूर्वं कदापि न भवितुमर्हति। 'काव्यादर्शः' अस्य मौलिक ग्रन्थो न प्रतिभाति। प्राचीनानामपि पद्यं काव्यदर्शे दृश्यते। "लक्ष्म लक्ष्मीं तनोतीति प्रतीतिसुभगं वचः" इत्यादौ इति शब्देन दण्डी महाकवि कालिदासस्य "मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति" इति पद्यांशमुद्धरति। अतः कालिदासस्य पद्यादेवास्यास्तित्वमिति निर्विरोधम्।

प्रो० पाठकमहाभागस्य सम्मत्या 'काव्यादर्शे निवर्त्यं विचार्यं' तथा प्राप्यहेतोर्विभागश्च वाक्यपदीयस्य कर्तुः भर्तृहरेः (६५० ई०) अनुसारं विद्यते।

प्रो० आर० नृसिंहाचार्यः काव्यादर्शे उल्लिखित राजवर्मा, नृसिंहवर्मण उपनाम्ना प्रसिद्धं मत्वा दण्डिनः स्थितिकालं सप्तम शताब्द्याः उत्तरार्धं स्वीकरोति । वस्तुतस्तु पल्लवराजस्य नृसिंहवर्मणः समयं ६९० ई० आरभ्य ७१५ पर्यन्तं मन्यते । अत अस्यैव सभापण्डितस्य दण्डिनः समयः सप्तम शताब्द्याः अन्त अष्टमशताब्द्यश्चादौ वा मन्तव्य इति युक्तिसङ्गतं प्रतिभाति ।

कृतयः—दण्डिनः एताः कृतयः समुपलभ्यन्ते ।

(१) काव्यादर्शम्, (२) दशकुमारचरितम्, (३) अवन्तिसुन्दरीकथा चेति । दशकुमारचरितं दण्डिनः गद्यकाव्यं विद्यते । दशकुमाराणां चरितं काव्येऽस्मिन् वर्णितमतो दशकुमारचरितमिति नाम । विशेषतः सप्तमशताब्दीषु, अष्टमशताब्दीषु भारते भारतीयानां क्रीडासु, आमोद-प्रमोदेषु आचार-विचारेषु वा कीदृशी भावनासीदिति दशकुमारचरितमनुशीलनेन साधु ज्ञायते ।

(३९) प्रश्नः–'दण्डिनः पदलालित्य'मित्युक्ति समर्थयन् दण्डिनः गद्यशैलीं समालोच्यताम् ।

उत्तरम्–महाकवेः दण्डिनः "दशकुमारचरितम्" संस्कृतसाहित्ये गद्यकाव्यत्रयेषु कथानकस्य रोमाञ्चकतायाः कौतूहलपूर्णतायाश्च कारणेन महत्त्वपूर्णं स्थानं भजते ।

दशकुमाराणां चरित्रचित्रणेनास्य नाम सार्थकं भवति । साहित्यिकदृष्ट्या दशकुमारचरितं श्लाघनीयं तथाख्यानककाव्यस्य ज्वलदुदाहरणं विद्यते । अस्य पात्राणि नाकाशलोकस्य प्राणिनः स्वर्गलोकविहारिणः वा दृश्यन्ते । अपितु साक्षान्मानुपतनुधारिणः पात्राणि विद्यन्ते । अत एव दण्डिनः पात्रस्य शिष्टो हासः, मधुरं व्यङ्ग्यम्, पारस्परिकप्रेमालापः सुखं दुःखं काव्ये यत्र-तत्र वर्णितमस्ति । वर्णनस्य स्वल्पता न कुत्रापि कथाप्रवाहम् अवरुणद्धि काव्यस्य मूलकथा न तु कुतश्चिदपि अवान्तरकथयावरुध्यते । दण्डिनः शैली, सुबोधा, सरला, सरसा तथा प्रवाहमयी च दृश्यते । अस्य गद्य न तु सुबन्धोरिव श्लेषभारेण दुरूहं, समासप्रवाहेण कठोरम्, अपि तु दैनन्दिनव्यवहारयोग्यं सजीवं सरलं मनोहरं च विद्यते ।

प्रसादगुण एव दण्डिनः गद्यस्य वैशिष्ट्यं वर्तते । सर्वदैवालङ्काराडम्बरेण दण्डी निजभाषां रक्षति । अत एवास्य भावाः शुद्धाः सरलाः प्रवाहात्मकाश्च जाताः । दण्डिना न सुबन्धोः श्लेषमयी शैली,न वा बाणस्य दीर्घसमासमण्डिता दुरूहा शैली च गृहीता अपितु गद्यसाहित्येऽस्य शैली पृथगेव निजमार्गमवलम्बते । अस्य गद्यस्यार्थस्पष्टता रसाभिव्यक्तिश्च विशिष्टगुणौ विद्येते । एभिर्गुणैः मण्डितं

गद्यं विलोक्य प्राचीनकालादेव समालोचकवर्गेषु आभाणकमिदं प्रसिद्धिं गतम्—'दण्डिनः पदलालित्यमि'ति। सत्यञ्च प्रतिभाति, विशेषगुणमण्डितस्य गद्यस्य किमपि वैचित्र्यं भवति लालित्यम्।

दण्डिनः गद्ये यादृशः लोकोक्तिप्रयोगो दृश्यते, न तादृशः प्रयोगः कुत्रापि गद्यकाव्ये विलोक्यते। लोकोक्तिप्रयोगेण दण्डिनः गद्यस्यापूर्वा शोभा जायते। तथा हि—"अभवदीयं हि नैव किञ्चित्, मत्सावद्यम्, जीवितं हि नाम जन्मवतां चतुः पञ्चाप्यहानि" इत्यादि वाक्ये लघुरपि सरसाभिव्यञ्जको भूत्वा केषां सचेतसां न हरति मनांसि।

अत एव समालोचकाः वाल्मीकिव्यासयोरनन्तरमेनं तृतीयं कविं मन्यन्ते।

जाते जगति वाल्मीकौ कविरित्यभिधाऽभवत्।
कवी इति ततो व्यासे, कवयस्त्वयि दण्डिनि॥

(४०) प्रश्नः—दण्डिप्रदर्शितं दशकुमारचरितानुसारं तत्कालीनसामाजिकदशायाः वर्णनं कुरुत।

उत्तरम्—सामाजिकः प्राणी भवति कविः। समाजेन सह तस्याविच्छिन्नो भवति सम्बन्धः। अतः कवेः कवितासु साहित्यिककृतिषु वा समाजस्य स्थितिः स्पष्टतया चित्रिता जायते। दण्डिनाऽपि निजाख्यानकाव्ये दशकुमारचरिते समाजस्य स्थितिः तथा धार्मिकभावना साधु चित्रिता।

काव्येऽस्मिन् शोभनाशोभनयोः द्वयोरपि वर्णनं दृश्यते। समाजस्याशोभनं पक्षं प्रदर्शयन् कविः अपहारवर्मणः प्रसङ्गे काममञ्जरीनाम्नी वेश्या मारीचनामानं तापसं केन कौशलेन वञ्चयति। अत्र प्रसङ्गे तपसः दम्भाभिमानयोः उपरि दण्डी कीदृशं व्यङ्ग्यं करोतीति सर्वविदितं विद्यते। स्त्रियः हृदयं सम्यग् जानाति स्म दण्डी। तत्कालीनस्त्रियः चरित्रं प्रकटयन् कुत्रापि कठोरहृदयायाः नार्याः चित्रणं चित्रमिवाङ्कयति। एवं प्रकारायाः नार्याः चित्रणं प्रस्तूय आदर्शभूतायाः पतिप्राणायाः पतिव्रतायाः कोमलहृदयं कमनीयशब्देन वर्णयित्वा समाजे कविः आदर्शनार्यः महत्त्वं बोधयति। "धूमिनी" यदि क्रूरहृदयायाः नार्यः प्रतिरूपास्ति तर्हि "गोमिनी" पतिप्राणायाः पतिव्रतायाः नार्यः सुन्दराकृतिरिव प्रतिभाति। द्वयोः नार्योः चरित्रं प्रस्तूय कोपयोगिनी, का चानुपयोगिनीति स्वयं समाजः निर्णयेत् इत्यभिप्रायेणैव स्वाभिमतं न प्रकटयति कविः। अयं कविः जनतायाः प्रातिनिध्यं करोति, अत एव समाजस्य सुखदुःखे, आनन्दवेदने च वर्णयति सप्तमशताब्द्यां भारतीयानामामोदप्रमोदानामाचार-विचाराणां ज्ञानं, दशकुमारचरितपठनेन सम्यग् भवतीति ध्रुवम्।

धार्मिक स्थितिः—कवेः शैवधर्मस्य प्रधानताऽऽसीत् । उज्जयिनी शैवधर्मस्य प्रधानः पीठः । उज्जयिन्यां महाकालेश्वरस्य प्रधानत्वं कालिदासकालादेव प्राप्यते । नगरमिदं शैक्षणिककेन्द्रं, तत्र शिक्षणाय जनैः बालकाः प्रेष्यन्ते स्म । उत्सवावसरे जनाः अत्रागत्य शिवस्य दर्शनं पूजनं च कुर्वन्ति । अस्मिन्समये बौद्धधर्मावलम्बिनी भिक्षुणी विवाहार्थं दौत्यकार्यं सम्पादयति स्म । जनपदीय सभागृहे जनतायाः मनोरञ्जनार्थं संगीतानुष्ठानं भवति स्म । उत्सवेषु कामोत्सवं प्रसिद्धमिति च दृश्यते । कुक्कुटयुद्धदर्शनाय जनाः समागच्छन्ति स्म ।

ताम्बूलभक्षणस्य प्रथाऽऽसीत् । अतिथिसत्कारेऽपि ताम्बूलं दीयते स्म । व्यापारे सिंहस्य चर्मणः प्रयोगो दृश्यते । जलनिष्कासनाय वंशनाल्याः प्रयोगोऽपि प्राप्यते ।

एवं प्रकारेण काव्ये सामाजिक-धार्मिक-स्थितिः वर्णितास्ति । साहित्यं समाजस्य दर्पणं भवति इति लोकोक्तिः काव्येऽस्मिन् सर्वथा चरितार्था दृश्यते ।

(४१) प्रश्नः—नाटकस्योत्पत्तिं तद् विकासपरम्परां च वर्णय ।

उत्तरम्—भारते नाटकस्योत्पत्तिः कथं जाता ? किमुपादानं गृहीत्वा भारते भारतीयनाट्यकलायाः उदयो जातः ? प्रश्नोऽयं जटिलः अनेकैर्विद्वद्भिरस्य मीमांसा कृता । परं न केषामपि मतं सर्वमान्यं प्रतिभाति । तथाप्यत्र कानिचित् मतानि प्रस्तूमः ।

१. डॉ० रिजवे महोदयः नाटकस्योत्पत्तिं वीरपूजायाः स्वीकरोति । यथा ग्रीकदेशे मृतपुरुषं प्रति सम्मानं प्रकटयन् तत्प्रतिक्रियया नाटकोत्पत्तिर्जाता, तथैव भारतेऽपि वीरपूजायाः नाटकोत्पत्तिः जातेति । रामलीला, कृष्णलीला इत्यादयः अस्याः परम्परायाः एवोदाहरणं विद्यते ।

२. डॉ० कीथ महोदयः, जनसाधारणस्याग्रे मूर्तिरूपेण बोभूयमानं प्राकृतिकपरिवर्तनं दर्शयितुमिच्छा भवति स्वाभाविकी, अतः सैव नाटकोत्पत्तेः प्रधानं कारणमिति भणति ।

३. जर्मनदेशस्य प्रसिद्धो विद्वान् डॉ० पिशेलमहोदयः, पुत्तलिकानृत्यात् नाटकोत्पत्तिं मन्यते । अस्य नृत्यस्य प्रारम्भः विकासो वा भारते एव जातः । भारतीयनाटके सूत्रधारः, स्थापकः शब्दद्वयस्यार्थेन मतमिदं समर्थयति । परन्तु अस्मात् साधारणनृत्यात् रससम्वलित-नाटकोत्पत्तिः रुचिकरा तथा युक्तियुक्ता च न प्रतीयते । केचिद् विद्वांसः छायानाटकादेव नाट्यकलायाः प्रादुर्भाव इति स्वीकुर्वन्ति ।

अनेके विद्वांसः भारतीयाः पाश्चात्याः वेदस्य संवादसूक्त्या नाट्यकलायाः

उत्पत्ति मन्यते। यतो हि कालिदासस्य विक्रमोर्वशीयनाटकस्याधारः उर्वशी-पुरुरवसोः संवाद एव। अतः विदुषां कथनमस्ति यत् अस्मिन् कथनोपकथने एव नाटकस्य बीजं निहितमस्ति। कालान्तरे बीजमिदं विकासं प्राप्य नाटकरूपेण प्रसिद्धि गतम्।

नाटकस्योत्पत्तिविषये नाट्यशास्त्रे एवं वर्णितमस्ति—"एकदा सांसारिक-जनं खिन्नं विलोक्य इन्द्रप्रमुखाः देवाः विधातुः पार्श्वे गताः। सविनयं ब्रह्मा प्रार्थितः यत् स्त्रीशूद्रोपयोगिवेदं रचय, येन सर्वेषां मनः रज्येत्। ततः ब्रह्मा ऋग्वेदात् पाठ्यम्, सामवेदात् संगीतम् यजुर्वेदादभिनयम्, अथर्ववेदात् रसञ्चा-दाय पञ्चमं नाट्यवेदं निर्मितवान्। उक्तञ्च—

"जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च।
यजुर्वेदादभिनयान् रसानाथर्वणादपि॥"

अस्याः कथाया आधारेण भारतीयविद्वांसः नाट्यकलाया आविर्भावं वेदा-देव मन्यते। सुखमये सत्ययुगेऽस्यावश्यकत्वं नासीत्, अतः त्रेतायुगे नाट्यक-लायाः तत्त्वं प्राप्यते, ऋग्वेदस्य सूक्तेन ज्ञायते यत् सोमविक्रयसमयेऽभिनयप्रद-र्शनं भवति स्म। रामायणयुगेऽपि नाट्यकलाया अस्तित्वं प्राप्यते। रामायणे शैलूषनट नर्तकशब्दानां प्रयोगः दृश्यते। महर्षिवाल्मीकिनोक्तम्—"नाराजके जनपदे प्रहृष्टनटनर्तकाः" इति। पाणिनेः सूत्रेषु पातञ्जलमहाभाष्येऽपि नाटक-स्योल्लेखः प्राप्यते। अनेन ज्ञायते यत् वैदिककालादारभ्य विक्रमादित्यस्य समयं यावत् नाट्यकलायाः निरन्तरं विकासोऽभूदिति।

विक्रमादित्यस्य समये आद्यनाट्यकारः महाकविकालिदासो जातः। ततः कालिदासारभ्य अविच्छिन्नरूपेण भारते नाट्यधारा प्रवहति। नाट्यकला भारतस्य निजीय साहित्यस्य सम्प्रतिनिधिरिति निश्चप्रचम्।

(४२) प्रश्नः—नाटकस्य महत्त्वं प्रदर्शयन् "काव्येषु नाटकं रम्य-मि"त्युक्तेः मूल्याङ्कनं कार्यम्।

उत्तरम्—नाटकं संस्कृतसाहित्यस्य परमगौरवात्मकमङ्गं विद्यते नाटकस्य प्रसादादेव संस्कृतसाहित्यस्य कीर्ति-कौमुदी निखिलेऽस्मिन् विश्वसाहित्ये चकास्ति। अतः काव्यापेक्षया नाटकमतिप्रतिष्ठास्पदं गण्यते। यतो हि काव्यापेक्षया नाटक-स्य रमणीयत्वं सर्वविदितं विद्यते। काव्यमर्मज्ञानानभिज्ञोऽपि दृश्याभिनयं चाव-लोक्य नाटकस्यानन्दमनुभवितुं शक्नोति। न ह्यत्र शब्दार्थज्ञानमनिवार्यं भवति। शब्दार्थज्ञानानभिज्ञोऽपि दृश्याभिनयाभ्यां काव्यानन्दं प्राप्तुं समर्थः। काव्यन्तु श्रवणेनैव जना प्रभावयितुं समर्थम्। नाटकन्तु नेत्रज्ञानेनैव हृदयं चमत्करोति।

श्रवणापेक्षयावलोकनसुखं श्रेष्ठतरमिति सर्वसाधारणोऽपि जानाति। काव्ये रसानुभूतिः अर्थज्ञानेनैव कर्तुं शक्यते परन्तु नाटके रसानुभूतिः दृश्यावलोकनेनैव जायते। अत एवोक्तं वामनाचार्येण—

"सन्दर्भेषु रूपकं श्रेयः तद्धि चित्रं चित्रपटवत् विशेषसौकल्यात्"।

'काव्यानन्दः ब्रह्मानन्दसहोदरः' इति सर्वमान्यः सिद्धान्तः। यः काव्यानन्दः काव्यात् काव्य-मर्म-ज्ञानवद्भिः प्राप्यते तमेवानन्दं नाटकात् सर्वसाधारणमतयोऽपि प्राप्तुं शक्नुवन्ति। काव्यापेक्षया सर्वजनाकर्षकत्वात् नाटकं रम्यं श्रेष्ठञ्चास्ति। उक्तञ्चैतत्–"नाटकान्तं कवित्वमिति"।

श्रीमता भरताचार्येण नाटकं सार्ववर्णिको वेद इत्युच्यते। यतो हि वेदः द्विजमात्रेभ्यः एवोपयोगी परन्तु नाटकं सर्ववर्णेभ्यः उपयोगीति। नाटके त्रैलोक्यस्य विषयस्यानुकीर्तनं भवति। नाट्यशास्त्रे प्रतिपादितं यथा—

"त्रैलोक्यस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम्॥"

एवं प्रकारेण नाटकं शक्तिविहीनहृदयेषु सञ्चारयति शक्तिम्, उत्साहयति शूरवीरम्। अज्ञानिनां कृते ज्ञानं, विदुषां कृते विद्वत्तां तनोति नाट्यशास्त्रम्।

भरताचार्येण उक्तञ्च—

"न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।
नासौ योगो न तत् कर्म नाट्येऽस्मिन् यन्न दृश्यते॥

एवं नाटकस्य श्रेष्ठत्वं रमणीयत्वं च विलोक्य केषाञ्चिद् विदुषां कथनं यत् 'काव्येषु नाटकं रम्यं' युक्तियुक्तं प्रतिभातीति दिक्।

(४३) प्रश्नः—नाट्यसाहित्ये भासस्य प्रसिद्धिरिति विषयमधिकृत्य नातिदीर्घो निबन्धो लिख्यताम्।

उत्तरम्—नाट्यसाहित्ये महाकविभासस्य महती प्रसिद्धरस्ति। अन्येषां नाटककाराणां का कथा? स्वयं महाकविः कालिदासोऽपि भासस्य वैशिष्ट्यं मुक्तकण्ठेन स्वीकरोति मालविकाग्निमित्रस्य प्रस्तावनायां स्पष्टमुक्तं सूत्रधारेण "प्रथितयशसां भाससौमिल्लकविपुत्रादीनां प्रबन्धानतिक्रम्य कथं वर्तमानस्य कवेः कालिदासस्य कृतौ बहुमानः"। अनेन ज्ञायते यत् कालिदासस्य समये भासस्य महती प्रसिद्धिरासीदिति। अस्य कृतयः सर्वसाधारणजनेषु विख्याता आसन्। अत एव कालिदासस्य कमनीयनाटकमपि जनाः समादरेण नावलोकयन्ति स्म। कालिदासस्य परवर्तिनः कवयोऽपि भासस्य नाटकं भृशं प्रशंसयामासुः। श्रीबाणभट्टेन हर्षचरितस्यादौ भासस्याति प्रशंसा कृता।

सूत्रधारकृतारम्भैः नाटकैर्बहुभूमिकैः ।
सपताकैर्यशो लेभे, भासो देवकुलैरिव ॥

महाकविः राजशेखरस्तु एवं लिखति यत् यदा नाटकस्याग्निपरीक्षा जाता तदा भासस्य नाटकचक्रं प्रज्वलितेषु वह्निषु प्रक्षिप्तं परन्तु स्वप्नवासवदत्तस्य दाहकः पावकोऽपि नाभूत् ।

भासनाटकचक्रेऽपि च्छेकैः क्षिप्ते परीक्षितुम् ।
स्वप्नवासवदत्तस्य दाहकोऽभून्न पावकः ॥

यद्यपि बहवो विद्वांसः स्वप्नवासवदत्तमेव भासस्य नाटकमिति स्वीकुर्वन्ति परमत्र राजशेखरस्य नाटकचक्रशब्दादनेकेऽस्य कृतय आसन्निति स्वीकारे न काप्यनुपपत्तिः । भासस्यैताः कृतयः समुपलभ्यन्ते । (१) प्रतिमानाटकम्, (२) अभिषेकनाटकम्, (३) पञ्चरात्रम्, (४) मध्यमव्यायोगः, (५) दूतघटोत्कचम्, (६) कर्णभारम्, (७) दूतवाक्यम्, (८) उरुभङ्गम्, (९) बालचरितम्, (१०) दरिद्रचारुदत्तम्, (११) प्रतिज्ञायौगन्धरायणम्, (१२) स्वप्नवासवदत्तम् ।

आसु कृतिषु स्वप्नवासवदत्तं भासस्य सफला नाट्यकृतिरस्ति । महाकविः भासः मानवजीवनस्य विविधक्षेत्रं निजकृतिषु अङ्कयितुं चित्रयितुं वा यत्नं कृतवान् ।

अत एवास्य कृतिषु विविधता सर्वत्रैव दृग्गोचरीभवति । भासस्य नाटकं नाटकीयाभिनयदृष्ट्यातिश्रेष्ठं गण्यते । यतो हि पात्रस्य संवादो न विस्तरः, न च पात्राणामाधिक्यं कस्मिन्नपि नाटके दृश्यते ।

संवादतत्त्वस्य तु भासः शिल्पीव विभाति । एवं व्यापकदृष्ट्या शास्त्रदृष्ट्या च भासस्य नाटकं सरलं सुबोधं, तथाभिनेयञ्चास्ति । अत एव भासस्य प्रसिद्धिः सर्वैः स्वीकृतेति दिक् ।

(४४) प्रश्नः—विविधमतप्रदर्शनपुरस्सरं भासस्य स्थितिकालो निश्चीयताम् ।

उत्तरम्—महाकविभासस्य स्थितिकालविषये विदुषां मतैक्यं नास्ति । विविधयुक्तिभिः विद्वांसः निर्णेतुं प्रयतन्ते । परन्तु केषामपि मतं सर्वमान्यं न भवति । अतोऽत्र कानिचित् मतानि प्रस्तुमः ।

(१) भासनाटकचक्रस्य प्रचारकः सम्पादकश्च श्रीगणपतिशास्त्रिमहोदयः महाकविभासं चाणक्य-पाणिनिभ्यां प्राचीनं मन्यते—

नवं शरावं सलिलैः सुपूर्णं, सुसंस्कृतं दर्भकृतोत्तरीयम् ।
तत्तस्य मा भून्नरकं च गच्छेत् यो भर्तृपिण्डस्य कृते न युध्येत ।

चाणक्यः पद्यमिदमुद्धरति। भासस्य प्रतिज्ञानाटकेऽपि पद्यमिदं समुपलभ्यते। एवञ्च प्रतिमानाटकेऽपि—"भोः ! काश्यपगोत्रोऽस्मि, साङ्गोपाङ्गं वेदमधीये, मानवीयधर्मशास्त्रं, माहेश्वरं योगशास्त्रं, प्राचेतसं श्राद्धकल्पञ्च ।" इत्यादौ बार्हस्पत्यार्थशास्त्रस्य प्रयोगात् अनुमीयते यत् भासः चाणक्यस्यानभिज्ञ आसीत्। अपाणिनीयप्रयोगदर्शनेन प्रतीयते यत् चाणक्यपाणिनिभ्यां प्राचीनो भास इति। अतः भासस्य समय ई० पू० पञ्चमशताब्द्यां मन्तव्यः । परन्तु मतमिदम् अनेके विद्वांसः अस्वीकुर्वन्ति ।

(२) डा० वार्नेट महाभागाः नाटकचक्रस्य कर्तारं कमपि केरलीय कल्पित-कविं स्वीकृत्य, मत्तविलासप्रहसनेन नाटकचक्रस्य शब्दसाम्यं च प्रदर्श्य तस्य समयं सप्तमशताब्द्या पूर्वं स्वीकुर्वन्ति । परमत्र "राजसिंहः" इति कस्यापि व्यक्तिविशेषस्य नाम स्वीकृत्य डा० महोदयः मतमिदं स्थिरीकरोति । दृढतर-प्रामाण्याभावात् मतमिदं विश्वसनीयं न प्रतिभाति ।

(३) डा० लेस्नी, प्रिन्ट्ज्, बैनर्जी, शास्त्री, इत्यादयः पौर्वात्यपाश्चात्य-विद्वांसः नाटकस्यान्तरपरीक्षणं विधाय कालिदासाश्वघोषयोर्मध्यकाले भासस्य समयं निश्चिन्वन्ति । बहवो विद्वांसः मतमिदं समर्थयन्ति । अतः भासस्य समयः तृतीयशताब्द्यां स्वीकार्य इति युक्तियुक्तं प्रतिभाति ।

(४५) प्रश्नः—स्वप्नवासवदत्तमधिकृत्य भासस्य नाट्यशैलीं समालोच्यताम् ।

उत्तरम्—महाकविभासः मानवजीवनस्य विविधावस्थां निजनाट्यकृतिषु चित्रितवान् । अत एवास्य नाटके विशेषतया विविधत्वं दृश्यते । भासस्य त्रयोदश-कृतिषु, प्रतिज्ञायौगन्धरायणम्, स्वप्नवासवदत्तम्, इति द्वे नाटके विकसिते, नाटकीयतत्त्वयुक्ते च दृश्येते । परिशेषस्तु एकाङ्की उपरूपको वास्ति । सर्वेषु नाटकेषु स्वप्नवासवदत्तमेवैतादृशं नाटकं विद्यते, यत्र भासस्य नाट्यकुशलतायाः निदर्शनं भवति । वस्तुतः स्वप्नवासवदत्तं, प्रतिज्ञायौगन्धरायणस्योत्तरार्द्धकथने न काप्यनुपपत्तिः । स्वप्नवासवदत्ते कविः भासः पात्राणां चरित्रचित्रणे नाट्यकलायाः अद्भुतं चित्रं चित्रयति । विशुद्धस्य विशदप्रेम्णः यादृशं वर्णनं भासेन कृतं तादृशं संस्कृतसाहित्ये सुदुर्लभम् । नाटकेऽस्मिन् नाटकीयघटनानामीदृशं मनोहरस्वरूपं प्राप्यते, यत् अस्वाभाविकतायाः दर्शनमेव कुत्रापि न भवति । स्वप्नवासवदत्तं

संस्कृतसाहित्यस्य जाज्वल्यमानं महार्हं रत्नं विद्यते इति नात्र संशयः। नाटकमिदं यथैव साहित्यिकदृष्ट्या महत्त्वास्पदं, तथैव व्यावहारिकदृष्ट्यापि परमोच्चस्थानं लभते।

यौगन्धरायणो हि आदर्शमन्त्री, सदैव राज्ञः राज्यस्य च सुरक्षां चिन्तयति, निजकर्तव्यपालनार्थं राज्ञः प्रियं कर्तुं यौगन्धरायणः वासवदत्तायाः वह्नौ ज्वलनस्य मिथ्यावृत्तं प्रसारयति। शत्रून् पराजयितुं दर्शकस्य सहायताऽत्यावश्यकीति ज्ञात्वा केन कौशलेन यौगन्धरायणः निजकार्यं संसाध्य पद्मावत्या सह वत्सराजस्य विहितविवाहे, तया विजयानन्तरं पुनः राज्ञः समीपे वासवदत्ताम् आनयति। अत्र कार्यकलापैः भासस्य कल्पनाशक्तौ कस्य हृदयं चमत्कृतं न भवति।

नाटकेऽस्मिन् भासस्य भाषा विचित्रास्ति। लघ्वपि वाक्यं विचित्रं भावार्थं द्योतयति। भासस्य कविता-कामिनी पदविन्यासेषु यादृशं प्रकृष्टं स्थानं भजते तादृशमेव भावप्रकाशनेऽपि।

भासः मानव-हृदय-विकार-मर्मज्ञः, तथा प्रकृतिवर्णनस्य महान् शिल्पी, रसालङ्कारयोः कलापक्षस्य च प्रियः कविरिति प्रतिभाति।

किमधिकं स्वप्नवासवदत्ते भासस्य शैली नितरां प्रशंसनीयेति निष्प्रपञ्चम्।

(४६) प्रश्नः—नाट्यकलादृष्ट्या हर्षवर्धनस्य नाटकानां मूल्याङ्कनं कार्यम्।

उत्तरम्—संस्कृतस्य नाटककारेषु प्रणयनाटिकायाः निर्माणे हर्षवर्धनोऽग्रगण्य आसीत्। प्रणयनाटिकानिर्मातृषु हर्षस्य महती प्रसिद्धिरस्ति। अस्य नाटकेषु भासकालिदासयोः प्रभावो दृश्यते। श्रीमता भासेन वत्सराजोदयनकथाऽनुसम्बन्धिनी द्वे नाटके रचिते। स्वप्नवासवदत्तं, प्रतिज्ञायौगन्धरायणञ्च। अनयोः नाटकयोः प्रभावो हर्षवर्धनस्य नाटके स्पष्टतयैव प्रतिभाति। एवं हि कालिदासस्य घटनावर्णनं वार्तालापप्रसङ्गश्च यथा दृश्येते तथैव हर्षस्य नाटकेऽपि दरीदृश्येते। कालिदास इव प्रकृतिमानवयोः साम्यस्य पक्षपाती हर्षवर्धनः। हर्षेणापि कालिदास इव मानवस्य हृदयगतभावं प्रकटयितुं प्रकृतेः प्रयोगः कृतः। अस्य प्रकृतिवर्णनं कामोत्सवस्यानन्दमयं साम्राज्यं दृश्यते। सागरिकोदयनयोः प्रथमसाक्षात्कारसमये कीदृशं प्रणयमयं मनोहरं वातावरणं कविः प्रस्तौतीति नाप्रत्यक्षम्। उपर्युक्तस्थानेषु ऋतुसाहाय्यैः प्रकृत्युद्दीपनैः कविरीदृशमवसरमुपस्थापयति यत् हठादेव नायक-नायिकयोः हृदयं प्रणयोन्मुखं भवति। एवं प्रकारेण प्रणयनाटिकायाः सफलो नाट्यकारः श्रीहर्षवर्धन इति स्वीकारे नातिशयोक्तिः। हर्षवर्धनस्य काव्यशैली सरला, प्रसादगुणगुम्फिता, तथातिसुबोध्या चास्ति।

वर्णनमियद् विशदं विद्यते यत् वर्णनीयविषयस्य चित्रं नयनयोरग्रे अङ्कितं भवति। रत्नावल्यां रङ्गक्रीडायाः वर्णनं सर्वथाऽनुपमं वर्तते। एवं नाटचकला-काव्यकलादृष्टया च हर्षवर्धनः सफलो नाटचकारः कविश्चेति निश्चप्रचम्।

रत्नावल्याः पद्यमिदं कीदृशं सरलं सुबोध्यं भावगम्यमिति दृश्यताम्—

किं पद्मस्य रुचिं न हन्ति नयनानन्दो न किं विद्यते ?
वृद्धिं वा झषकेतनस्य कुरुते नालोकमात्रेण किं ?
वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरुज्जृम्भते ?
दर्पः स्यादमृते न चेदिह तवाप्यस्त्येव बिम्बाधरे ?

एवं हर्षवर्धनस्य नाट्यशैली नितरां मनोहारिणी अतिप्रशसनीयेति किमधिकमिति दिक्।

(४७) प्रश्नः—महाराजहर्षवर्धनस्य संक्षिप्तं परिचयं दत्त्वा संस्कृतसाहित्ये तस्य स्थानं निर्धार्यताम्।

उत्तरम्—महाकविबाणभट्टस्य हर्षचरितेन तथा ह्वेन्साङ्ग इत्याख्यस्य यात्राविवरणेन च हर्षवर्धनस्य परिचयः ज्ञायते।

अस्य पिता प्रभाकरवर्धनः माता च यशोमती। हर्षवर्धनस्य ज्येष्ठो भ्राता राज्यवर्धनः तथा भगिनी राज्यश्रीः सुयोग्या विदुषी चासीत्। हर्षवर्धनः आखेट-व्यसनी तथा युद्धपण्डित आसीत्। पितुराज्ञयाऽनेन समराङ्गणेऽसंख्याताः शत्रवः पराजिताः। हर्षवर्धनस्य राजधानी स्थाण्वीश्वरमासीत्, तथास्य राज्यकालः ६०६ ईस्वीयादारभ्य ६४७ ईस्वीपर्यन्तं स्वीक्रियते।

महाराजो हर्षवर्धनः न केवलं वीरतायाः मूर्तिः, अपितु ललितकलायाश्चा-त्यनुरागी संस्कृतस्य प्रतिभासम्पन्नः कविरासीत्।

'गुणाः गुणज्ञेषु गुणाः भवन्ति' इत्यनुसारेण हर्षवर्धनस्य सभायां श्रीबाण-भट्टः, मयूरभट्टः, मातङ्गदिवाकरश्चेत्येते ख्यातिप्राप्ताः संस्कृतकवयः ख्यातिं लेभिरे। कविभिरेभिः समलङ्कृताऽस्य सभा संस्कृतसंसारे विख्याताऽस्ति।

महाराजो हर्षवर्धनः एतावान् गुणग्राहकोऽभवत् यत् चाण्डालकुलोत्पन्नाय मातङ्गदिवाकराय बाणमयूरयोरिव सम्मानं ददौ। यथा वर्णितं राजशेखरेण—

'अहो प्रभावो वाग्देव्याः यन्मातङ्गदिवाकरः।
श्रीहर्षस्याभवत् सभ्यः समो बाणमयूरयोः॥

एवं संस्कृतप्रियेषु राजसु विक्रमादित्यशूद्रकप्रभृतिषु श्रीहर्षवर्धनोऽद्वितीयः प्रतिभाति।

महाराजो हर्षवर्धनः न केवलं कवीनां विदुषां वा आश्रयदाता, अपि तु स्वयमपि प्रतिभासम्पन्नः कविः आसीत्। संस्कृतस्य रमणीयं सरसं च नाटकं निर्माय संस्कृत-नाट्य साहित्यस्य शोभां वर्धयामास। श्रीहर्षवर्धनस्यैतानि नाट्य-कृतयः सन्ति—(१) प्रियदर्शिका, (२) रत्नावली, (३) नागानन्दम्।

बहवो विद्वांसः अस्य कृतित्वविषये सन्देहं कुर्वन्ति परमियं भ्रान्तिः। आसु तिसृषु नाट्यकृतिषु साम्यदर्शनात्, हर्षवर्धनस्य कृतिस्वीकारे न काप्यनुपपत्तिः प्रतिभाति।

धन्यतममिदं संस्कृतसाहित्यं येन परमसौभाग्यशालिनः हर्षवर्धनसदृशस्य राज्ञः संरक्षणं प्राप्तम्। संस्कृतस्यानेके कवयः एनं प्रशंसन्ति। एवं संस्कृत-साहित्ये श्रीहर्षवर्धनस्य महत्त्वपूर्णं स्थानं विद्यते।

(४८) प्रश्नः—भासकालिदासयोः तुलनात्मकं विवेचनं कार्यम्।

उत्तरम्—(१) महाकविः भासः संस्कृतसाहित्यस्य तत्रापि विशेषतः नाट्य-साहित्याकाशस्य जाज्वल्यमानो नक्षत्रमासीत्। आधुनिककालेऽपि तस्य नाट्य-कलां कविताशैलीञ्च दृष्ट्वा काव्यरसिका मोदन्तेतमाम्। महाकविः भासः संस्कृतसाहित्ये यदा नाटकं लिखितुं प्रारब्धवान्, तदा नासीत् संस्कृतसाहित्ये कस्यापि तादृशं नाटकं यदवलोक्य तन्निर्दिष्टनाट्यकलां गृहीत्वा नाटकं रचितुं शक्नुयात्। भासस्य कृतिषु या नाट्यकला सा भासस्य स्वात्मभूता। जन्म-कालोऽयं संस्कृतनाटकस्य, यदा भास एव एतादृशः प्रथमो नाट्यकारः यस्य कृतेरनुकरणेन संस्कृतसाहित्ये मनोहरातिमनोहरतमं नाटकं साम्प्रतमपि दृश्यते।

भासस्य परवर्तिनो ये ये नाटककाराः समभूवन् ते सर्वेऽपि भासस्य ऋण-भाजः सन्ति। महाकविः कालिदासोऽपि अस्य वैशिष्ट्यं मुक्तकण्ठेन स्वीकरोति संस्कृतसाहित्यस्यामरो गीतकारः श्रीजयदेवोऽपि भासस्य कवितां प्रशंसयन् समलिखत्—

> 'भासो हासः कविकुलगुरुः कालिदासो विलासः।
> केषां नैषा कथय कविताकामिनी कौतुकाय॥' इति।

एवं प्रकारेण संस्कृतसाहित्ये भासस्य महती प्रसिद्धिः दृश्यते। विकसित-नाट्यसाहित्यस्य श्रेयः प्राप्तु भास एवार्हति नान्यः।

२—कालिदासस्य प्रतिभाविषये किं कथनीयम्। महाकाव्ये गीतिकाव्ये, खण्डकाव्ये, नाटके, सर्वत्रैव कालिदासस्य प्रतिभानुमेयाऽतुलनीया चास्ति। नाट्यकलापरिपूर्णस्य नाटकस्य प्रणेता कालिदास एव जातः। अस्य 'अभिज्ञान-शाकुन्तलम्' संस्कृतसाहित्यस्यातिमहार्हं रत्नं विद्यते। अस्यैव प्रसादात् संस्कृत-

नाटकस्य यशः विश्वसाहित्येषु चकास्ति । आङ्ग्लाः समालोचकाः अपि अभिज्ञानशाकुन्तलमधिकृत्यैव कालिदासः संस्कृतसाहित्यस्य "शेक्सपीयरः" इति प्रशंसावाक्यमुच्चारयन्तः नतमस्तकाः भवन्ति । अहो ! धन्योऽस्ति सरस्वत्याः वरदपुत्रः साहित्यदेवतासंपूजकः कालिदासः । यस्य कवितां विलोक्याधुनापि सर्वे तं भूयो भूयः प्रशंसन्ति ।

उभयोर्तुलना—भासकालिदासौ द्वावेव कवी निज-निज क्षेत्रे महान्तौ स्तः । नाट्यस्याविर्भावसमये महाकविभासः सर्वप्रथमं त्रयोदशनाट्यग्रन्थानि कुड्मलमिव नाटकसूत्रेषु ग्रथयित्वा यच्छ्रेयः प्राप्तवान् तत् केनापि न प्राप्तमिति ।

यद्यपि भासस्य कृतिषु विकसिताः नाट्यकलाः नहि दृश्यते, तथापि भाविनाटककारस्य कृते प्रेरणादायकानि स्फूर्तिप्रदायकानि अस्यैव नाटकानि समभूवन् ।

विशेषतः कालिदासः शूद्रकश्च भासस्य कृतिभ्यः, विपुलतरां भावशैलीं जग्रहतुः । कालिदासस्तु विकसितनाट्यकलायाः कोमल-कल्पनायाः प्रथमो नाट्यकारः, तथापि कालिदासः भासस्य परवर्ती-कविरिति हेतोः भासस्यानुकरणं भाषाभावशैलीं स्वच्छन्दतया गृहीतवान् । अतः कालिदासोऽपि भासस्य अतिऋणीति नात्र सन्देहः । यथा भासस्याभिषेकनाटके चतुर्थाङ्के—

'यस्यां न प्रियमण्डनापि महिषी देवस्य मन्दोदरी' इत्यादि पद्यस्य बिम्बग्रहणं विधाय कालिदास 'अभिज्ञानशाकुन्तले' लिखति—"पातुं न प्रथमं व्यवस्यति जलं, युष्मास्वपीतेषु या" एवं शाकुन्तलस्य प्रथमाङ्के—"विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगाः" इत्यादि पद्यं भासस्य प्रतिमानाटकस्य प्रथमाङ्के—"विश्रब्धं हरिणाश्चरन्त्यचकिता देशागतप्रत्ययाः" इत्यादिपद्येन कियत् साम्यमिति नाप्रत्यक्षं विदुषाम् ।

किमप्यस्तु-द्वावेव-कवी संस्कृतसाहित्यस्य ख्यातिप्राप्तौ कवीति निश्चितमेव ।

महाकविभासः—नाटकस्याविर्भावकाले रङ्गमञ्चोपयुक्तं साभिनेयं नाटकं निर्माय, तथा निजकृतिषु मानवजीवनस्य विविधावस्थां सन्निवेश्यातिख्यातिं प्राप्तवान् ।

महाकविकालिदासश्च विकसितनाट्यकलाधारीभूतं विश्व-श्रेष्ठं नाटकं विरचय्य संस्कृतसाहित्यस्य सुषमां संवर्धयामास । अतः निज-निजक्षेत्रेषु द्वावेव सफलौ प्रसिद्धौ कवीति नात्र संशयः । सम्प्रति काव्यकलादृष्ट्या नाट्यकलादृष्ट्या च कालिदासस्य महिमा सर्वोपरि वर्तते इति स्वीकारे केषां विमतिः स्यात् ।

(४९) प्रश्नः—कवेः विशाखदत्तस्य साहित्यिकपरिचयो दीयताम् ।

उत्तरम्—संस्कृतस्य निखिलेभ्यः नाटककारेभ्यः भिन्नोऽयं विशाखदत्त नामा नाट्यकारः, यः कूटनीतिं, राजनीतिञ्चाश्रित्य नाटकं निर्मितवान् ।

कवेः राजवंशसम्भवात् राजनीतिषु पक्षपातो दृश्यते । विशाखदत्तस्य पितामहः श्रीवटेश्वरदत्तः वत्सराजाभिधस्य देशस्य सामन्तराजाऽऽसीत् । पिता चास्य भास्करदत्तः "महाराणा" इत्युपाधिनालङ्कृत आसीत् । विशाखदत्तः कौटिल्यार्थशास्त्रस्य शुक्रनीतिशास्त्रस्य च प्रकाण्डविद्वान् आसीत् । ज्योतिःदर्शनन्यायशास्त्रेषु चास्य नैपुण्यं दृश्यते । वैदिकधर्मावलम्बी विशाखदत्तः बौद्धधर्ममपि अत्यादरेण समवलोकयति स्म । अस्यैतानि नाटकानि प्राप्यन्ते—(१) मुद्राराक्षसम्, (२) देवीचन्द्रगुप्तम्, (३) अभिसारितवञ्चितकम् ।

स्थितिकालः—विशाखदत्तस्य स्थितिकालविषये विविधानि मतानि सन्ति । डॉ० जायसवालमहोदयः अस्य स्थितिकालं ४०० ईस्वीयशताब्द्याः समीपे मन्यते । केचित् समालोचकाः षष्ठ्यां शताब्द्याम् अस्य समयं मन्यन्ते ।

४९० ईस्वीयशताब्द्यां श्रीवराहमिहिरः बृहत्संहितायामस्योल्लेखं करोति, अतः वराहमिहिरात् पूर्वं पञ्चमशताब्द्यां विशाखदत्तस्य समयः स्वीकार्य इति न्यायसङ्गतं प्रतिभाति । अस्य कृतिषु मुद्राराक्षसं महनीयं नाटकं विद्यते । पात्राणां चरित्रचित्रणबलेन कथितुं शक्यते यत् सफलमिदं नाटकं यत्र विशाखदत्तस्य भाषा-भाव-शैली, कवित्वशक्तिः एतद् द्वयमपि कवेः वैशिष्ट्यं तनोति । वस्तुतः अस्य नाटके न हि कालिदाससदृशं कल्पना-भाव-चाञ्चल्यं, न वा भवभूतिरिव हृदय-विदारक-करुण-धारा कुत्रापि प्रवहति, न च भट्टनायकसदृशं सैनिकानां प्राणान् प्रणयितुः निमन्त्रणं विलोक्यते । विशाखदत्तस्य नाटकेऽपि युद्धं भवति परमत्र द्वयोः राजनीतिज्ञयोः बुद्धिवैभवास्त्रेण समरं भवति नास्त्रेण । मुद्राराक्षसे चाणक्यराक्षसौ निजकूटनीत्या विलक्षणं राजनीतिकयुद्धं सन्दर्श्य दर्शकान् मोहयतः । अत्र तु विनैवास्त्रं शत्रु-जयो भवति । अतः मुद्राराक्षसं संस्कृतनाटकेषु निःसन्देहमद्वितीयनाटकमिति निश्चप्रचम् ।

(५०) प्रश्नः–मुद्राराक्षसमधिकृत्य विशाखदत्तस्य नाट्य-कलायाः समीक्षा कार्या ।

उत्तरम्—संस्कृतसाहित्ये मुद्राराक्षसं नाम नाटकमनेकाभिः दृष्टिभिरद्वितीयाकृतिरिति नात्र संशयः । संस्कृतस्य सर्वाणि नाटकानि प्रणयगाथाश्रयीभूतानि विद्यन्ते परमस्मिन्नाटके प्रणयगाथायाः नितान्तमभावः । नाटके नायिका प्रायो भवत्येव परमत्र नायिकायाः नामापि न श्रूयते । नाटकस्य वातावरणं

ललितं मनोहरञ्च कर्तुं विदूषकः सर्वत्रापि नाटके सन्निवेश्यते, परन्तु मुद्राराक्षसे विदूषकस्यापि नितरामभावः। वस्तुतः नाटकमिदम् आद्यन्तं यावत् ओजस्वितायाः पौरुषस्य चोपरि आधारीभूतमस्ति। यद्यपि महाकविभासस्य "प्रतिज्ञायौगन्धरायणम्" कूटनीत्याधारीभूतं नाटकं विद्यते परमस्मिन् मुद्राराक्षसे या ओजस्विता दरीदृश्यते न सा प्रतिज्ञायौगन्धरायणे। संस्कृतसाहित्ये निःसन्देहं वीररसस्य सफलं 'वेणीसंहारम्' नाटकमस्ति। परन्तु अनेनापि मुद्राराक्षसस्य तुलना कर्तुं न शक्यते। यतो हि वेणीसंहारनाटके युद्ध-भीषणता नाटकस्य वातावरणं नितरां भयावहं करोति। स्थाने-स्थाने सैनिकानाम् अन्योऽन्यसंघट्टने नाटकस्य वातावरणं सर्वदैव खटखटायते। अतः ऐतिहासिक-राजनैतिक-कथाभूतं वीररसपूर्णमपि "वेणीसंहारनाटकं" मुद्राराक्षसस्य न तुलामुपयाति। मुद्राराक्षसेऽपि युद्धं तु भवति परमत्र सैनिकानां युद्धं न भवति। द्वयो राजनीतिज्ञयोः राजनीतिसमराङ्गणे कूटबुद्धयस्त्रेण समरं भवति नास्त्रेण, खड्गेन, धनुषापि वा। चन्द्रगुप्तस्य कथनमिदम्—"विनैव युद्धादार्येण जितं दुर्जयं परबलमिति" युक्तियुक्तं प्रतिभाति। अतः मुद्राराक्षसं नाटकसाहित्येऽद्वितीया कृतिरिति कथने नातिशयोक्तिः।

मुद्राराक्षसे विशाखदत्तस्य शैली पुरुषार्थपूर्णास्ति। मुख्यो रसः वीरः। कविः तावदेवालङ्कारं पद्ये प्रयुक्तवान् यावदस्ति भावप्रकाशने आवश्यकः। पात्रानुरूपं भावनिरूपणं तथा भाषाप्रयोगश्च दृश्यते। तृतीयाङ्के शरदर्तोः वर्णनं नितान्तं प्रभावपूर्णं विद्यते।

कविर्विशाखदत्तः नाटकं वीररसपूर्णं तथौजपूर्णं च कर्तुं यथाशक्तिः सत्प्रयत्नो दृश्यते सफलश्चाभूत्। पात्राणां चरित्रचित्रणेऽपि कवि-प्रतिभा सर्वातिशायिनी। भाषा-भावयोः, शैली-पात्रचरित्रचित्रणयोः कवित्वशक्तेश्च सम्यक्तया कृतायां समालोचनायां मुद्राराक्षस विशाखदत्तस्य निखिलेऽस्मिन् संस्कृतसाहित्ये सफलमद्वितीयम् ऐतिहासिकं नाटकमिति निश्प्रचमेवेति दिक्।

(५१) प्रश्नः—शूद्रकस्य परिचयं दत्त्वा तस्य स्थितिकालो निर्णीयताम्।

उत्तरम्—"मृच्छकटिक"नाटकस्यादौ शूद्रकस्य परिचयः यथा वर्णितोऽस्ति, तदनुसारेण शूद्रकः हस्तिशास्त्रेषु प्रवीण आसीत्। अनेन शिवस्यानुग्रहेण ज्ञानं प्राप्तं विधिना चाश्वमेधयज्ञं कृतवान्। राज्यसिंहासने पुत्रं प्रतिष्ठाप्य शतायुः शूद्रकोऽग्निं प्रविष्टः। अग्निप्रवेशस्य कथा केनाप्यन्येन नाटकेऽस्मिन् सन्निवेशितेति प्रतीयते, यतो हि लेखको भूतकालिकक्रियायाः प्रयोगं स्वात्मनि कर्तुं नार्हति।

संस्कृतसाहित्ये शूद्रकस्य महती प्रसिद्धिरस्ति । विविधग्रन्थेषु शूद्रकस्य विषये तथैव लिखितं प्राप्यते तथा विक्रमादित्यस्य विषये । कादम्बरी, कथासरित्सागरं, शोभावती, वेतालपञ्चविंशतिः इत्यादिग्रन्थेषु विविधमस्येतिवृत्तं वर्णितमस्ति । यूरोपीयविद्वांसः मृच्छकटिकस्य कर्ता शूद्रकः नासीदिति मन्यन्ते । बहवो विद्वांसः शूद्रकस्य सत्ताविषयेऽपि सन्दिहानाः सन्ति, परमियं भ्रान्तिरस्ति । शूद्रकः विक्रमादित्य इव प्रतिभासम्पन्नः ऐतिहासिकः पुरुष आसीत् ।

स्थितिकालः—शूद्रकस्य स्थितिकालविषयेऽपि विविधानि मतानि वरीवृत्यन्ते । भारतीया विद्वांसः अस्य समयं विक्रमाब्दस्य प्रथमशताब्द्यां मन्यन्ते । श्रीवामनाचार्यः काव्यालङ्कारसूत्रे शूद्रकस्योल्लेखं कुर्वन् "द्यूतं नाम पुरुषस्य असिंहासनं राज्यमि"त्यादिगद्यमुद्धरति । अतः अष्टमशताब्द्याः पूर्वं शूद्रकस्य समयो मन्तव्यः । मनुस्मृतेरुद्धरणं मृच्छकटिके प्राप्यते । अतो मनुस्मृतेः रचनाकालादनन्तरम् अस्य रचनाकालो भवितव्यः । शूद्रकः मृच्छकटिकस्य नवमाङ्के "अङ्गारकविद्या प्रवीणस्य बृहस्पतेः" इत्यस्मिन् पद्ये बृहस्पतिमंगल-विरोधं दर्शयति । वराहमिहिरस्य सिद्धान्तानुसारम् अनयोः मैत्रीभावो वर्तते । अतः वराहमिहिरात् प्रागेवास्य स्थितिः प्रतीयते ।

एतेषामन्तरङ्गप्रमाणानां समालोचनेन शूद्रकः दण्डीवराहमिहिरयोः पूर्ववर्ती सिद्ध्यति । अयं भावः यत् अस्य समयः पञ्चमशताब्द्यां मन्तव्य इति न्यायसङ्गतं प्रतिभाति ।

(५२) प्रश्नः–नाटचकलादृष्टचा 'मृच्छकटिकस्य' समीक्षा कार्या ।

उत्तरम्—नाटचकलादृष्टचा मृच्छकटिकं सुन्दरं सफलं च नाटकं विद्यते । संस्कृतसाहित्ये सर्वप्रथममस्मिन्नेव नाटके राजवंशातिरिक्तः तथा निम्नवर्गस्य सामाजिको जनः नायकः दृश्यते । संस्कृतनाटकेषु नायकः विशेषतया राजा राजवंशोद्भवो वा भवति, अतः साधारणजनसमाजेन सह नाटकस्य सम्बन्धो न भवति । परन्तु शूद्रकः प्राचीनपरिपाटीं परित्यज्याभिनवां नाटचकलां गृह्णाति । मृच्छकटिकनाटके तत्कालीनसमाजस्य प्रतिबिम्बं विद्यते । "साहित्यं समाजस्यादर्शः" इत्याभाणकमस्मिन्नेव नाटके चरितार्थं दृश्यते ।

नाटकस्य कथानकं तथा नाटकस्य वातावरणं, नितान्तयथार्थं विद्यते । अत एव विदेशीयाः नाटकमेतत् बहुप्रशंसन्ति । नाटकस्य पात्रं कल्पनोपपादितमिति न लक्ष्यते, प्रतीयते यत् सर्वाणि पात्राणि सामाजिकानि तत्प्रतिनिधयश्च एव । एवं नाटचकलादृष्टचा शूद्रकस्य रूपकमिदं परमश्लाघनीयं सफलञ्च विद्यते ।

शैली—शूद्रकस्य शैली सरला प्रसाद-गुण-गुम्फिता चास्ति । लम्बायमानस्य वृत्तस्य प्रयोगोऽतिन्यून एव । नूतनो भावः, अभिनवोऽर्थः स्थले-स्थले प्राप्यते । नाटकस्य मुख्यो रसः शृङ्गारः । वर्षर्तु-वर्णनं शूद्रकेण कियन्मनोहरं विशदीकृतमिति न कदापि विस्मर्तव्यम् । विविधाः सचमत्कृतसूक्तयः नाटके दरीदृश्यन्ते कविना न्यायालयस्य वर्णनं कियत्सुन्दरं कृतमिति दृश्यताम्—

"चिन्तासक्तनिमग्नमन्त्रिसलिलं, दूतोर्मिशङ्खाकुलम्,
पर्यन्तस्थितचारनक्रमकरं, नागाश्वसिंहाश्रयात् ।
नानावासक-कङ्क-पक्षिरुचिरं कायस्थसर्वास्पदं,
नीतिक्षुण्णतटं च राजकरणं हिंस्रैः समुद्रायते ॥

एवं प्रकारेण शूद्रकः मृच्छकटिकनाटके यत्र यत्र समाजस्य, राज्ञः, तथा राजकर्मकस्य, वेश्यायाः चौरस्य च एतादृशं चित्रं प्रस्तौति यत् नाटकपठनेन तत्कालीनसमाजस्य चित्रम् अस्माकं सम्मुखे आलिखित चित्रमिवाभासते । किमधिकं मृच्छकटिकनाटकं सफलं सामाजिकं नाटकमिति न केषाञ्चित् विमतिः ।

(५३) प्रश्नः—भट्टनारायणस्य परिचयं दत्त्वा "वेणीसंहार"-नाटकस्य समीक्षा कार्या ।

उत्तरम्—संस्कृतसाहित्ये भट्टनारायणस्य परिचयः स्थितिकालविषयकं च ज्ञानमतिकठिनं विद्यते । यतो हि कविना नाटकस्य प्रस्तावनायां तथाऽन्यत्रापि च स्वस्मिन् विषये किमपि न लिखितम् । नाटकस्य प्रस्तावनया केवलं ज्ञायते यदयं मृगराजलक्ष्म आसीत् । किंवदन्त्यनुसारेणायं कान्यकुब्जदेशस्य मान्यः नाट्यकार आसीत् । गौडदेशस्य राज्ञः आदिसूरस्य निमन्त्रणात् अनुरोधाद् वा वंगीयेषु पञ्चब्राह्मणेषु श्रीभट्टनारायणोऽन्यतम आसीत् । जनश्रुत्यनुसारेणायम् "आदिसूर" सामयिको मन्यते । राज्ञः आदिसूरस्य समयः सप्तमशताब्द्याः उत्तरार्धे स्वीक्रियते । भट्टनारायणस्यापि समय अयमेव भावितुमर्हति ।

वेणीसंहारस्य समीक्षा—महाभारतस्य महत्त्वपूर्णघटनाधारीभूतमिदं नाटकम् । दुःशासनापमान-ताप-तप्ता द्रौपदी प्रतिज्ञातवती यद् दुर्योधनदुःशासनयोः मृत्युं प्राप्तयोः सतोरेव निजवेणीं सज्जितां करिष्यामि । प्रतिज्ञामिमां सत्यां कर्तुं महाभारतस्य कथामादाय कविनाऽतिकौशलेन "वेणीसंहारं" नाम नाटकं रचितम् । संस्कृतस्य नाट्यशास्त्रानुसारेण नाटकमिदमादर्शमयं विद्यते । नाटकेऽस्मिन् पञ्चसन्धीनां पताकास्थानकानां साधुः सन्निवेशः दृश्यते । नाटकस्य पात्राणि इतिहासप्रसिद्धानि वीररसपूर्णानि च सन्ति । पात्रेषु भीमसेनस्य चरित्र-

मतिवीरतापूर्णमस्ति । परमपुरुषार्थस्य, ओजस्वितायाश्च निदर्शनं भीमसेनस्य कार्यम् । या प्रतिज्ञादौ भीमसेनेन कृता साऽन्तं यावत् परिपालिता । याज्ञसेन्यपमानं शल्यमिवास्य हृदये विद्धमस्ति । दुर्योधनस्य चरित्रमपि पराक्रमपूर्णं विद्यते । स्त्रीपात्रेषु द्रौपदीभानुमत्योः चरित्रमतिकोमलं विद्यते । भानुमती पतिव्रतायाः मूर्तिरिव प्रतिलक्ष्यते । नाटकेऽस्मिन् मुख्यो रसः वीरः, रौद्रशृङ्गारौ च सहायकौ । शान्तरसोऽपि यद्यपि नाटकादौ वर्ण्यते परमयं गौण एव । भानुमतीदुर्योधनयोः द्वितीयाङ्के शृङ्गारप्रसङ्गः, "अकाण्डे प्रथनम्" इत्युक्त्वा विद्वांसः रसदोषं दर्शयन्ति । एवं नाटयकलादृष्ट्या वेणीसंहार-नाटकं नितान्तं निर्दोषं सफलञ्चास्ति ।

(५४) प्रश्नः—राजशेखरस्य साहित्यिकः परिचयो देयः ।

उत्तरम्—स्वयमयं कविः नाटकस्य प्रस्तावनायां निजपरिचयेन परिचाययति तदनुसारेण "यायावर" वंशेऽस्य जन्म जातम् । कथ्यते वंशोऽयं कवीनामुत्पत्तौ कल्पतरुरिवासीत् । राजशेखरस्य प्रपितामहः कविवरः "अकालजलद" इति नाम्ना ख्यात आसीत् । पिता चास्य दुर्दकः माता च शीलवती । चौहानवंशजाता क्षत्रिया नाम्नावन्ति-सुन्दरीति ख्याता राजशेखरस्यार्धाङ्गिणी, या सर्वशास्त्रनिष्णातातिविदुषी चासीत् । महाराष्ट्रान्तर्गतविदर्भदेशवास्तव्यो राजशेखरः कान्यकुब्जेश्वरस्योपाध्यायपदं समलङ्कृतवान् । अस्याश्रयदाता महेन्द्रपालो विख्यातराजाऽऽसीत् । अस्यैव राज्ञः समकालीनत्वात् राजशेखरस्य स्थितिकालः नवमशताब्द्याः अन्तिमे अथवा दशमशताब्द्याः पूर्वार्धभागे मन्यते । राजशेखरस्य पाण्डित्यं काव्यक्षेत्रेऽपि विख्यातमासीत् । स्वयमयं कविः वाल्मीकेः भवभूतेर्वा आत्मानमवतारं मन्यते । तद्यथा—

"बभूव वाल्मीकिभवः कविः पुरा ततः प्रपेदे भुवि भर्तृमेण्ठताम् ।
स्थितः पुनर्यो भवभूतिरेखया स वर्तते सम्प्रति राजशेखरः ॥"

कृतयः—राजशेखरः बालरामायणे "विद्धि नः षट्प्रबन्धान्", इति शब्दैः षट्प्रबन्धान् परिचाययति । परमधुनाऽस्य पञ्चकृतयः प्राप्यन्ते । यथा—(१) काव्यमीमांसा, (२) बालरामायणम्, (३) बालभारतम्, (४) विद्धशालभञ्जिका, (५) कर्पूरमञ्जरीति ।

काव्यमीमांसा अलङ्कारशास्त्रं विद्यते । काव्यस्यालङ्कारस्य च विवेचनमत्र प्राप्यते । बालरामायणं विशालकायं नाटकं विद्यते । विद्धशालभञ्जिका चतुरङ्का नाटिका, परमत्र प्राकृतभाषायाः प्रयोगात् सट्टकेति कथ्यते । राजशेखरः

आत्मानं कविराजं मन्यते । काव्यमीमांसानुसारेण योऽन्यतरप्रबन्धे प्रवीणः स महाकविः, यस्तु तत्र तत्र भाषाविशेषे तेषु तेषु प्रबन्धेषु तस्मिन्रसे स्वतन्त्रः स कविराजः । राजशेखरः वस्तुतस्तु कविराजः न तु नाटचकारः । अस्य प्रबन्धकाव्यस्य प्रतिभा नितरां प्रशंसनीयाऽऽसीत् । नाटकमस्याभिनेयं नास्ति । नाटकेऽपि काव्यप्रतिभैवास्य प्रतिलक्ष्यते न तु नाटचकला कुत्रापि दृग्गोचरी भवति ।

वर्णने शब्दक्रीडायाञ्च कवेः मनो रमते न तु नाटकस्याभिनेयतत्त्वेषु । अतः नाटके तादृशी लोकख्यातिरनेन प्राप्ता यादृशी भवभूतिना कालिदासेन वा प्राप्तेति दिक् ।

(५५) प्रश्नः—राजशेखरस्य नाटचकलायाः समीक्षा कार्या ।

अथवा

राजशेखरः प्रतिभासम्पन्नकविः न तु नाटचकार इति युक्तियुक्तं निरूप्यताम् ।

उत्तरम्—कस्यापि कवेः प्रतिभाकवित्वशक्तिश्च तस्य ग्रन्थसाहाय्येन परीक्ष्यते । कृतावेव तस्याभिरुचिः, कवित्वशक्तिः, प्रतिभा वा परिचीयते । राजशेखरस्य कृतिषु तस्याभिरुचिं कविताप्रवाहं च विलोक्य प्रतीयते यत् राजशेखरे नाटकीया प्रतिभा नासीत् । अस्य प्रतिभा प्रबन्धकाव्यानुरूपा दृश्यते । बालरामायणमस्याभिनेयं रूपकं नास्ति । यतो हि नाटकतत्त्वापेक्षया कविः वर्णने, छन्दोऽलङ्कारच्छटाप्रदर्शने निजचातुर्यं प्रदर्शयति । अतः बालरामायणं नाटचपद्धत्यातिविरुद्धमिव लक्ष्यते । काव्यं करोमि नाटकं वेति विस्मृत्य कविः बालरामायणे एकचत्वारिंशदधिकसप्तशतानि (७४१) पद्यानि व्यरचयत् । षडशीति स्रग्धरावृत्तबद्धानि पद्यानि, द्विशताधिकानि शार्दूलविक्रीडितानि पद्यानि सन्ति । पुष्पकविमानमारुह्य श्रीरामस्यायोध्यागमनं पञ्चशतोत्तरेषु पद्येषु वर्णितमस्ति । सर्वेयं प्रबन्धकाव्यानुरूपा शैली, न तु नाटचाभिनयशैली, अतः प्रबन्धकाव्यकुशलो राजशेखरः, न तु नाटचकार इति कथने नात्युक्तिः ।

वस्तुतस्तु नाटकं विरचय्य राजशेखरः निजप्रतिभायाः दुरुपयोगं कृतवान् । नाटके श्रमं परित्यज्य यदि काव्ये कृतप्रयत्नः स्यात् तर्हि संस्कृतसाहित्ये कालिदासमाघभारवय इव राजशेखरोऽपि कीर्तिभाक् स्यात् ।

राजशेखरः स्वीयनाटचकला-त्रुटिना नानभिज्ञः, अत एव निजभणितिगुणं प्रशंसति न नाटचगुणम् । आलोचकानां मुखं मुद्रयितुमुक्तमनेन । यथा—

"ब्रूते यः कोऽपि दोषं महदिति सुमतिर्बालरामायणेऽस्मिन्,
प्रष्टव्योऽसौ पटीयान् इह भणिति गुणो विद्यते वा न वेति ॥"

यद्यस्ति स्वस्ति तुभ्यं भव पठनरुचिः, इत्यादिप्रसङ्गेन इदमपि ज्ञायते यत् कविसम्मतया सानुरागं पठनार्थं बालरामायणम्, न तु अभिनयदर्शनार्थम्। वस्तुतो—राजशेखरः शब्दकविः। अस्य पदानां रमणीयो वाक्यविन्यासः काव्य-रसिकान् मोहयति। शैली चास्य गौडी दृश्यते। यत्र तत्र पाञ्चाल्याः प्रयोगोऽपि सुन्दरः। भवभूतेः शिष्यो राजशेखरः, अतः शब्देनार्थो व्यज्यते, शब्द-चमत्कारो दर्शनीयो विद्यते। परन्तु रसपरिपाके भवभूतेः या प्रतिभा, काव्य-कला वा दृश्यते सान्वेषणेनापि राजशेखरे न लब्धुं शक्यते। नाटकेऽपि पात्र-प्रतिभा, पात्रसजीवता च नितरां प्रशंसनीया। इति शम्।

(५६) प्रश्नः-नाटककारजयदेवस्य परिचयं दत्वा 'प्रसन्नराघवस्य' समीक्षा कार्या।

उत्तरम्—नाटककारः श्रीजयदेवः कौण्डिन्यगोत्रीय तथास्य माता सुमित्रा, पिता च महादेवनामासीत्। तार्किकोऽप्ययं कविः, कवितानिर्माणे प्रवीण आसीत्। अस्य कथनमस्ति यत् सर्वकर्कश वक्रोक्ति वचनं सुमधुरायाः भाषायाः निर्माणे तस्याः सौन्दर्यसम्पादने सर्वथाऽसमर्थमस्ति। मिथिलादेशवास्तव्योऽयं कविरिति प्रतीयते।

न्यायशास्त्रस्य टीकाकर्तुः श्रीजयदेवात् तथा गीतगोविन्दकारमहाकविजय-देवादपि भिन्नोऽर्वाचीनश्चायं कविः। प्रसन्नराघवमस्यैकमात्रं कृतिः। कविराजः श्रीविश्वनाथः (१४ चतुर्दशशताब्दी) प्रसन्नराघवस्य पद्यं ध्वनेरुदाहरणे उद्धरति। अतोऽस्मात् पूर्ववर्ती श्रीजयदेवः। अयं भावः यत् त्रयोदशे शतकेऽस्य स्थितिकालो मन्तव्य इति न्यायसङ्गतं प्रतिभाति।

प्रसन्नराघवस्य समीक्षा—सप्ताङ्कमिदं नाटकम्, अत्र रामकथायाः वर्णनं नितरां प्रशंसनीयं दृश्यते। प्रसाद-गुण-गुम्फितायाः कवितायाः आधिक्यात् प्रसन्नराघवमिति नाटकस्य संज्ञा युक्ततमा प्रतिभाति। नाटके कथावर्णनेन प्रतीयते यत् नाटके नाटकीयतत्वापेक्षया कवित्वशक्तेरधिकोपयोगः जातः। कोमल-कान्तकवितायाः अभिव्यक्तौ नितरां प्रवीणोऽयमिति। द्वितीयाङ्कस्य वाटिका-वृत्तान्तं कवेः कल्पनायाः निदर्शनमिव प्रतीयते। षष्ठाङ्के विरहिणः रामस्य वर्णनं नितरां करुणं विद्यते। विपिने सकलानि वस्तूनि सीतायाः कुशलादिकं पृच्छन् विरह विधुरो रामः विलपति, मूर्च्छति, ग्लायते, खिद्यते च। श्रीराम-स्यैवं कथनं यथा रामचरितमानसे श्रीतुलसीदासेन वर्णितं तथैवात्रापि प्राप्यते।

असौ तुलसीदासः श्रीजयदेवस्यानेकानि पद्यानि सम्मुखं धृत्वा पद्यं रचितवान् । नहि केवलमत्र भावसाम्यम् अपितु शब्दसाम्यमपि प्राप्यते । यथा श्रीतुलसीदासस्य—"चन्द्रहास हरु मम परितापं रघुपतिविरह अनल-सञ्जातं" श्रीजयदेवः—"चन्द्रहास ! हर मे परितापम् । रघुपतिविरहअनल सञ्जातम् ।" अत्र न केवलं भावसाम्यम्, अपितु शब्दसाम्यमपि विचारणीयं विद्यते । श्रीतुलसीदासेन युक्तमभिहितम्—"नानापुराणनिगमागमसम्मतं यत्" इत्यादि । तुलसीदासेन अधिकतरमाख्यानमध्यात्मरामायणात् गृहीतं तथा कथोपकथनं हनुमन्नाटकात् यथाऽनेन गृहीतं, तथैव प्रसन्नराघवादपि सुन्दरातिसुन्दरं भाववचनं गृहीतमिति नात्र संशयः ।

अतः कविता-दृष्ट्या प्रसन्नराघवं नाटकमतिप्रशंसनीयं विद्यते । मास्तु नाटके नाटकीयतत्त्वस्य निर्वाहः, किन्तु घटनायाः नाटकीयरूपप्रदाने सफलो जयदेव इति निश्चप्रचमेवेति दिक् ।

(५७) प्रश्नः—किं नाम गीतिकाव्यं, किं च तस्य वैशिष्ट्यम् ?, सयुक्तिकं प्रतिपादयत ।

उत्तरम्—संस्कृतसाहित्ये गीतिकाव्यं रमणीयमुद्यानमिव सहृदयान् मोहयति । गीतिकाव्ये मानवस्य हृदयतन्त्री गीतिकाव्यात् स्वरमादाय यदा किमपि मुग्धं मधुरञ्च गुनगुनायते, तदालौकिकचिन्तां विस्मृत्य अलौकिकानन्दे क्षणं यावत् लीनो भवति जनः । गीतिकाव्यस्य सम्बन्धः अन्तःकरणेन भवति, अतस्तत्र सर्वेषां मनो रमते । सङ्गीततानलयेनापि गीतेरविच्छिन्नः सम्बन्धः । सङ्गीतेषु कापि एतादृशी अनिर्वचनीया शक्तिरस्ति यथा पशुपक्षिणोऽपि मुह्यन्ति, का कथा मानवस्य ? गीतिकाव्ये कृत्रिमता न भवति ।

हृदयस्य संगीत-तान-लयप्रधानस्वर एव गीतिरित्युच्यते । आशयमेनं प्रदर्शयन् हिन्दीसाहित्यस्य लब्धप्रतिष्ठेन मान्यतमेन कविना सुमित्रानन्दनेन युक्तमभिहितम्—

"वियोगी होगा पहला कवि, आह से निकला होगा गान ।
उमड़कर नयनों से चुपचाप बही होगी कविता अनजान ।।

गीतिकाव्यस्याविर्भावः वैदिकसाहित्ये वेदादेव जातः। वेदानामन्यतमो भागः सामवेदः गेयात्मक एव । लौकिकगीतिकाव्यस्य विकासः कालिदासस्य मेघदूतात् स्वीक्रियते । संस्कृतसाहित्ये गीतिकाव्यस्य द्वौ भेदौ स्तः । मुक्तकगीतिकाव्यं, प्रबन्धात्मकगीतिकाव्यं सन्दर्भरहितं भवति । यतो हि मुक्तकगीतिकाव्यस्य रसास्वादनाय प्रकरणस्यावश्यकता नास्ति । मुक्तकं रसभरितं मोदकमिवास्वाद्य

सहृदय-हृदयः तृप्तो भवति मुक्तककाव्यस्य प्रवर्तकाः एते कवयः समभवन्। भर्तृ-हरि-अमरुकेत्यादयः।

प्रबन्धात्मकस्य गीतिकाव्यस्य प्रवर्तकः कालिदासः। अस्य मेघदूतं प्रबन्धात्मकगीतिकाव्यस्य जाज्वल्यमानं हीरकमिव प्रतीयते।

गीतिकाव्यस्य सुमधुर-पद-विन्यासः, सङ्गीतमयं वृत्तं हठादेव जनानाकर्षति। शृङ्गार-नीति-वैराग्य-प्राकृतिकदृष्टया यथैवास्य बाह्यस्वरूपं सुन्दरं भवति, तथैव कोमलभाव-विन्यासेन आभ्यन्तर-स्वरूपमपि अभिरामतां भजते। गीतिकाव्ये नारीसौन्दर्यस्य यादृशं स्वाभाविकं चित्रं प्राप्यते न तादृशमन्यत्र कुत्रापि। शृङ्गारस्य विभावावस्थायाः चित्रणं, रूपछटा च, नारीहृदयस्य सरसं चित्रीकरम् इति द्वे गीतिकाव्यस्य परमवैशिष्ट्ये विद्येते।

संयोगावस्थायां विप्रयोगावस्थायां च प्रकृतिः मानवहृदयं निजमार्मिकप्रभावं प्रदर्शयति। प्राकृतिकसौन्दर्यं संयोगे उल्लसितं चित्तं नितरामुत्तरलीकरोति।

वियोगावस्थायाञ्च प्रकृतेः स्वरूपं चित्रमिव प्रतीयते। एवं मानवजीवनेन गीतिकाव्यस्य घनिष्ठः सम्बन्धो भवति। अतः गीतिकाव्यम् अन्यकाव्यापेक्षया वैशिष्ट्यं भजते।

(५८) प्रश्नः—गीतिकाव्ये मेघदूतस्य स्थानं निर्धार्यताम्।

उत्तरम्—गीतिकाव्यस्यादितमं काव्यं मेघदूतम्। अत्र काव्ये कुबेरशापविमुक्तस्य यक्षस्य मनोव्यथायाः मार्मिकं चित्रं विद्यते। मेघदूते कालिदासस्य नरप्रकृतिबाह्यप्रकृत्योः सूक्ष्मनिरीक्षणशक्तिः साधु विलोक्यते। बाह्यप्रकृतेर्या प्रधानतात्र दृश्यते, सा संस्कृतसाहित्यस्यान्यकाव्ये सुदुर्लभैव। पूर्वमेघः बाह्यप्रकृतेः भारतभूमेश्च मनोहरं चित्रं प्रस्तौति। ग्रीष्मर्तौ मन्दप्रवाहिनी नदी प्रोषितपतिका नारीव चित्र्यते, या पतिवियोगात् मलिनवसना सक्लेशं यापयति जीवनम्। वियोगावस्थायाः वर्णनं कृत्वा कविः मानवहृदयस्य मनोहरं चित्रमुपस्थापयति। विरहपीडितहृदयस्य मार्मिकवेदनया भरितमस्ति सम्पूर्णं मेघदूतम्। एवं संस्कृतसाहित्यस्यातिमहार्हं रत्नमस्ति मेघदूतम्। नास्य तुलामर्हति किमपि काव्यमन्यत्। विरहविधुरायाः प्रेयस्याः समीपे सन्देशं दत्त्वा मेघस्य प्रेषणमेवास्ति विलक्षणकल्पना। रामायणेऽपहृतायाः पार्श्वे रामस्य दूतत्वेन हनुमतः प्रेषणं तथा महाभारते दमयन्त्याः दूतत्वेन हंसं संप्रेष्य प्रणयभावनिवेदनं निश्चितं कालिदासात् प्राचीनं दृश्यते, परमत्र रामायणमहाभारतादौ दौत्यकार्यं सचेतनेन सम्पाद्यते। मेघदूते तु अचेतनस्य मेघस्य दूतत्वेन प्रेषणं कालिदासस्य विचित्राऽस्ति कल्पनेयम्।

संस्कृतसाहित्यस्य प्रधानालोचकेन श्रीमता मम्मटेन मेघस्य दूतप्रेषणं न युक्तिसहमिति दोषमभिहितम्।

अवाचोऽव्यक्तवाचश्च दूरदेशविचारिणः ।
कथं दौत्यं प्रपद्येरन् इति युक्त्या न युज्यते ॥

परमस्मिन् विषये कालिदासेन स्वयमेव मेघदूते अभिहितम्—कामार्ता हि प्रकृतिकृपणाः चेतनाचेतनेषु" कालिदासोक्त्यानया ज्ञायते यत् कामसम्पीडितो जनः चेतनाचेतनं न विचारयति, स तु विश्वसिति यत् मेघः जलप्रदानेन शुष्कमपि वनस्पतिं सिक्त्वा जीवयति, तदा विरह-विधुरां कामपि नायिकां कथं न सुखयेत् ? एवं कालिदासस्य मेघदूतं विशिष्टप्रेरणादायकं काव्यं विद्यते । मेघदूतस्यानुकरणात् संस्कृतसाहित्ये विविधानि दूतकाव्यानि दृश्यन्ते । यथा—शीतदूतम्, चन्द्रदूतम्, हनुमद्दूतम्, सिद्धदूतम्, हंसदूतम्, एवं दूतकाव्यस्य परम्परा मेघदूतस्य प्रसादादेवोपलभ्यते ।

(५९) प्रश्नः–श्रीजयदेवस्य जीवन-परिचयं दत्त्वा गीतगोविन्दस्य वैशिष्ट्यमुद्घाट्यताम् ।

उत्तरम्—गीतगोविन्दकारः श्रीजयदेवः बंगालप्रदेशस्थ केन्दुविल्वनगरस्य निवासी आसीत् । श्रूयते अधुनापि नगरेऽस्मिन् सहस्रशो जनाः एकत्रीभूय महाकवि जयदेवाय श्रद्धाञ्जलिमर्पयन्ति । अस्य पितुर्नाम भोजदेवः माता च राधा (रमा) देव्यासीत् । राज्ञो लक्ष्मणसेनस्य समकालत्वात् जयदेवस्य स्थितिकालः एकादशशताब्द्यां स्वीक्रियते । जयदेवस्य जीवनम् आनन्दकन्दव्रजचन्द्रस्य भक्तिपरिपूर्णमिव लक्ष्यते । बहिरभ्यन्तरयोश्चास्य जीवने भक्तिरस एव केवलं दृश्यते । जयदेवस्य गीतगोविन्दकाव्यम् अमरकाव्यं विद्यते । काव्यस्य द्वादश सर्गाः सन्ति । प्रतिसर्गं कोमल-पद-विन्यासस्य सुमधुरगीतस्य साम्राज्यमिव दृश्यते । सर्गस्थकथां सम्बन्धयितुं कतिपयवर्णात्मकं पद्यमपि प्राप्यते । गीतगोविन्दस्य मधुरतां संस्कृतभारत्याः पराकाष्ठैव प्रतीयते । इतोऽधिकं माधुर्यं किं स्यात् ? ईदृशः सरसो मधुरभावविन्यासः कालिदासस्य काव्येऽपि न दृश्यते । राधाकृष्णयोः लीलां यथा ललितमधुरशब्देनास्मिन् काव्ये श्रीजयदेवः प्रस्तुतवान् तादृशं मधुरवर्णनं विश्वसाहित्येऽपि प्रयत्नतोऽन्वेषणेनापि न प्राप्यते ।

"ललित लवङ्गलता परिशीलन कोमलमलयसमीरे ।" इत्यादि पद्ये माधुर्यस्य पराकाष्ठैव । विरहविधुरायाः वर्णनं कीदृशं हृदयहारकं मार्मिकञ्चास्ति । "वहति च वलितविलोचनजलभरमाननकमलमुदारम् । विधुमिव विकटविधुन्तुददन्तदलनगलितामृतधारम् ॥"

उपमोत्प्रेक्षायां काव्यमिदं सर्वथानुपमेयं विद्यते । राधाकृष्णयोरनुरागम् आध्यात्मिकरूपकेण श्रीजयदेवः अतिकौशलेन प्रस्तौति ।

शृङ्गार-शिरोमणि: श्रीकृष्ण: परब्रह्मण: प्रतिनिधि:, राधा गोपिका वा जीवस्य प्रतिनिधि: । एवं हि राधाकृष्णयो: सङ्गम: जीव-ब्रह्मणो: सङ्गमो विद्यते । यादृशं शब्दमाधुर्यं तादृशमेवार्थमाधुर्यमपि दृश्यते । दृश्यतां पद्यमिदम्—

"दृशौ तव मदालसे वन्दनमिन्दुसन्दीपकम्,
गतिर्जनमनोरमा विजितरम्भमुरुद्वयम् ।
रतिस्तव कलावती रुचिरचित्रलेखे भ्रुवा,
विबुधयौवनं वहसि तन्वि पृथ्वीगता ।।

(६०) प्रश्न:—कथासाहित्यस्योद्भवो विकासश्च वर्णनीय: ।

उत्तरम्—साम्प्रतं कथासाहित्यस्य गौरवं पाश्चात्यसाहित्येषु नितरामधिकं दरीदृश्यते । पाश्चात्यकथासाहित्येन प्रभावितो जन: पूर्वीयसाहित्येष्वपि कथाया: महत्त्वं स्वीक्रियेत । बहवो विद्वांस: भारतीयसाहित्येषु कथानाटकयोराविर्भाव: पाश्चात्यसाहित्यप्रभावादेव जात इति कथयन्ति । वस्तुत: एवं कथनं नितान्त-पक्षपातपूर्णं विद्यते । ये केऽपि एवं भणन्ति ते भारतीयसाहित्यानभिज्ञा: पाश्चात्यशिक्षादीक्षिता: सन्ति । अत: पाश्चात्यसाहित्यकलामेव सर्वस्वं स्वीकृत्यैवं भणन्ति । विश्वेषु सर्वप्राचीनतमोऽस्माकं वेद एव । सर्वासां साहित्यकलाना-मुद्गमभूमिरपि वेद: । यथा नाटकस्याविर्भाव: वेदादेव जात: तथैव कथाया अपि जन्म वेदादेव जातमिति ध्रुवमेव मे मतम् । कथासाहित्यस्योदय: सर्वप्रथमं भारते एव जात: । तदनन्तरं निखिलेषु विश्वेषु कथेयं भ्रमितुं प्रारब्धवती श्रेष्ठ-साहित्येषु स्थानं च गृहीतवती । षष्ठशताब्दीषु तस्या: कथाया: लोकप्रियता दृश्यते या पञ्चतन्त्रेषु साम्प्रतमप्युपलभ्यते । साहित्येषु पञ्चतन्त्रस्य विशिष्टं स्थानं विद्यते । अतिप्राचीनतमास्ति पञ्चतन्त्रस्य कथा । या पञ्चतन्त्रस्य कथा तृतीयशताब्दीषु बृहत्कथा तन्त्राख्यायिकारूपेण प्रसिद्धाऽऽसीत् । तस्या: मौलिकं स्वरूपमद्यापि पञ्चतन्त्रे प्राप्यते ।

पञ्चतन्त्रस्य दमनककर्कटौ समभावेन भारतीयान् पाश्चात्यविदेशीयान् वा प्रभावयत: । षष्ठशताब्दीषु भारतरूसयो: घनिष्ठसम्बन्ध आसीत् ।

तत्रस्थ: सम्राट्न्यायात्मिकां पञ्चतन्त्रस्य कथां विलोक्य आकृष्टो जात: । अत: पञ्चतन्त्रस्य कथाया: अनुवादं कारितवान् । अस्या अनुवादस्य शृङ्खला पाश्चात्यदेशेषु एवं तीव्रगत्याऽचलत् यत् सप्तमी शताब्दीषु न केवल अरब्येषु अस्या: प्रभावो दृश्यते अपितु चीनदेशेऽपि अस्या: प्रभावो लोकप्रियता च लक्ष्यते ।

मध्ययुगे संसारेषु सर्वश्रेष्ठा सभ्या नासीत् अरब्यभाषा । अस्या: भारतीय-कथाया: अरब्यभाषाकृतानुवादे सति विविधासु भाषासु तथा लैटिन ग्रीक, जर्मन, फ्रेञ्च, फेनिश तथाङ्ग्लभाषास्वपि भारतीयकथानाम् अनुवादो षोडश-

शताब्दीं यावत् निरन्तरं भवति स्म । एवं भारतीयकथायाः कथा अतिरुचिरा प्राचीनास्ति । विश्वसाहित्येषु भारतीयकथायाः प्रकृष्टतमं स्थानं विद्यते । इत्यस्मिन् न कोऽपि संशयः ।

(६१) प्रश्नः—कथासाहित्ये पञ्चतन्त्रस्य स्थानं निर्धार्य अस्य शैल्याः समीक्षा कार्या ।

उत्तरम्—कथासाहित्येषु पञ्चतन्त्रस्योन्नतं स्थानं विद्यते । पञ्चतन्त्रस्य कथा नितान्तप्राचीनतमास्ति । विभिन्नशताब्दीषु पञ्चतन्त्रस्य संस्करणं विविधरूपेण प्राप्यते । साम्प्रतमस्य चत्वारि संस्करणानि समुपलभ्यन्ते । एषु सर्वप्राचीनतमं तन्त्राख्यायिकसंस्करणं वर्तते । अस्य प्रथमसंस्करणस्यानुवादः आरब्यभाषायां जातः । द्वितीयसंस्करणं बृहत्कथान्तरे निर्दिष्टमस्ति । तृतीयं संस्करणं तन्त्राख्यायिकारूपं तन्त्रजैनकथासंग्रहनामकमस्ति । चतुर्थं दक्षिणीपञ्चतन्त्रस्य मूलरूपं मन्यते ।

एवं प्रकारेण पञ्चतन्त्रं नहि केवलं सामान्यग्रन्थः, अपितु विश्वसाहित्यस्य प्रतिनिधिग्रन्थोऽस्ति । पञ्चतन्त्रस्य पञ्च-तन्त्राणि सन्ति । अत्र तन्त्रं भाग मित्रभेदः, मित्रलाभः, सन्धि-विग्रहः, लब्धप्रणाशः, अपरीक्षितकारकञ्च । प्रतितन्त्रम् एका मुख्या कथा । तस्या एव पुष्टयर्थं विभिन्नाः गौणलघुकथा सम्बध्यन्ते । ग्रन्थकारस्योद्देश्योऽस्ति नीतिसदाचरयोः शिक्षणम् ।

कथ्यते महिलारोप्यनगरे अमरकीर्ति नाम राजाऽऽसीत् । तस्य चत्वारो मूर्खपुत्रा आसन् । तनैव मूर्खपुत्रान् नीतिशास्त्रेषु सुशिक्षितान् प्रवीणांश्च कर्तुं राजा विष्णुशर्माणं पण्डितमन्विष्य निजमूर्खपुत्रान् समर्पयामास । विष्णुशर्मा लौकिकव्यवहारशास्त्रयोः प्रकाण्डविद्वानासीत् । स निजचातुर्येण नीतिकौशलेन च स्वल्पकाले एव राजपुत्रान् नीतिकुशलान् कृतवान् । ग्रन्थकारस्य नीतिकौशलं ग्रन्थस्य प्रतिपृष्ठं विलोक्यते ।

संसारस्य विविधकार्यनिरीक्षणशक्तिः तथा विनोदप्रियता पञ्चतन्त्रे साधु दृश्यते । पञ्चतन्त्रस्य भाषा सरला, सरसा, अतिभावगम्या चास्ति । एतादृशो वाक्यविन्यासो न दृश्यते, यत्र दुरूहत्वं भावदुर्बोधं वा प्रतीयते । कथा गद्ये वर्णितास्ति परन्तु उपदेशात्मकं शिक्षणं पद्येष्वेव वर्ण्यते । एतानि पद्यानि रामायण-महाभारतयोः तथान्यनीतिशास्त्रस्य वा सन्ति ।

एवं पञ्चतन्त्रं विश्वव्यापकं प्रेरणादायकं पुस्तकमस्ति । विश्वसाहित्यस्य महार्हो मणिरिव प्रतिभाति पञ्चतन्त्रम् ।

॥ इति शुभम् ॥